Shri Raghunath Temple MSS. Library,
JAMMU

No. 2629 (महाभारते।
Title भगवद्गीता च टीका सहिता
१९ दशाध्यायः
Author श्रीवेदव्यास व्यासः
Extent २०५ Age ४
Subject वेदान्त शास्त्रं

१५२

(महाभारते)

भगवद्गीता अष्टादश
टीकासहिता एका
पञ्चाध्यायः

२१२१

एकादशोऽध्याय

शांकरभाष्य
आनंदगिरिटीका तदीय
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
ऊहमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

अर्जुनउवाच मदनुग्रहायपरमंगुह्यम
ध्यात्मसंज्ञितं यत्त्वयोक्तंवचस्तेनमोहो
यंविगतोमम २

श्रीधरभाष्ये २

भगवतोविभूतय उक्तास्तत्र च विष्टभ्याहमिदं कृत्स्नमेकां
शेन स्थितो जगदिति भगवताभिहितं श्रुत्वायज्जगदात्मरू
पमात्मैश्वरं तत्साक्षात् कर्तुमिच्छन्नर्जुनउवाच मदनुग्रहा
र्थं परमं निरतिशयं गुह्यं गोप्यं अध्यात्मसंज्ञितमात्मनात्मविवेक
विषयं निरतिशयं यत्त्वयोक्तं वचोवाक्यं तेन वचसा मोहोयंवि
गतो ममाविवेकबुद्धिरगातेत्यर्थः २ ५८

आनन्दगिरिकृतटीका २

तेन तेनात्मना भगवदनुसन्धानार्थंश्रुताविभूतीरनुवदति भ
गवन्निति परस्य सोपाधिकं निरुपाधिकञ्च चिद्रूपं ध्येयत्वेन
ज्ञेयत्वेन चोक्तमित्यर्थः सोपाधिकमैश्वरं रूपमशेषजगदात्मकं ५ ५७
विश्वरूपाख्यमधिकृत्याध्यायान्तरमवतारयन्ननन्तरग्रन्थोप
न्यासेन श्लोकौकीर्तयति नञ्चेति यदेतदशेषप्रपञ्चात्मकमखिल ५८
श्चेतस्य जगतः कारणं सर्वज्ञं सर्वैश्वर्यैकरूपमुक्तं तदिदं श्रु
त्वा तस्य साक्षात्कारे यियाचयिषुरादौ एष्टव्यनिमाह श्रुत्वेति म
यि कृपया निमित्तीकृतोपकारोनुग्रहस्तदर्थमिति वचसोविशे
षणं निरतिशयत्वं परमपुरुषार्थसाधनत्वं श्रवणाध्यानादिलक्ष
णार्थप्रधानवाक्यं मोहस्यायमित्यात्मसात्कृत्य दर्शयति १

श्रीधरकृतटीका २

विभूतिर्वेभवेप्रोक्तारूपयापरयादृशिः दिष्टस्तेनस्थाप्यविश्वरूप
मदर्शयत् पूर्वाध्यायेनेविष्टभ्याहमिदं कृत्स्नमेकांशेनस्थितोजग
दिति विश्वात्मकंपारमेश्वरूपमुपन्यासेनदिष्टवान् पूर्वोक्तमभि
नन्दति अर्जुनउवाच मदनुग्रहायेतिचतुर्भिः ममानुग्रहायगोप्य
मिदमध्यात्म संज्ञितं निर्गुणयेपरमे परमार्थनिष्ठंगुह्यंगोप्यमपिअध्यात्म संज्ञितं

आत्मानात्मविवेकविषयंयत्नयोक्तंवचः अशोच्यानन्वशोचस्त्वं प्र
ज्ञावादांश्चभाषसइत्यादिग्रन्थाध्यायपर्यंतेयद्वाक्यंतेनममायंमोहो
हंहेतायतेहंतव्याइत्यादिलक्षणोभ्रमोविगतोविनष्टः आत्मनःक
र्त्तव्यताद्यभावोक्तः १

पैशाचभाष्यम् ४

एवंभगवन्मुखात्संक्षेपविस्तराभ्यां [illegible] विभूतिंक्रत्वापरङ्
पंरहृष्टकामोर्जुनउवाच मदनुग्रहायेति अध्यात्मसंज्ञितमध्यात्म
प्रतिपादकंवचनमप्यपचारेणात्मसंज्ञितमित्युच्यते १

रामानुजभाष्य ४

एवंनक्रियायोगनिष्पन्नयेनहृदयेचसकलेनरविलक्षणेनस्वा
भाविकेनभगवदसाधारणेनकल्याणगुणगणेनसहभगवतः
सर्वात्मत्वेननयनद्वितिरिक्तस्वकृत्स्नस्याचिदविद्यात्मकस्यवस्तुजा
तस्यशरीरतयातदायत्तस्वरूपस्थितिप्रवृत्तिभेदंचोक्तं तदेवभग
वदसाधारणस्वभावंकृत्स्नस्यतदायत्तस्वरूपस्थितिप्रवृत्तिभेदंचोक्तभ
गवत्सकाशंईदृशमप्येवमेवेतिचनिश्चितंतथाभूतेभगवतेसा
क्षात्कर्तुंकामोर्जुनउवाचतथैवभगवत्प्रसादादनेनरहस्यंति
सर्वाश्चर्यमयंदेवमनेनविष्णो [illegible] त्वं नत्रैकस्थंजगत्कृत्स्नंप
विभक्तमनेकधेति मदिदंदेहात्माभिमानरूपमोहेनमोहित
स्यममानुग्रहैकप्रयोजनायपरमंगुह्यंपरमरहस्यमध्यात्मसंज्ञि
तमात्मनिवक्ष्यमाणंवचः नत्वेवाहंजातुनासमित्यादितस्माद्योगी
भवार्जुनेतदर्थंयत्नयोक्तेनायंममात्मविषयोविमोहः सर्वोवि
गतःदूरतोनिरस्तः १

श्रीमधुसूदनसरस्वती ६

समनेनतत्त्वेनाध्यायेनयएवार्थउक्तस्तमेवप्रपञ्चीकर्तुमर्जुनः प्र
श्नेति सएवचायमुपक्रमःयोनुपदेशक्रमेणार्थोवगतः सएव
प्रपञ्चसंविदापाद्यमाणःस्फुटीभवतिनदर्थमेवेमेउक्तिप्रत्य-
क्षीउच्यते ॥ ६ परमेपार्थ रूपाणि इत्यादि नमत्तरंपरमंवेदितव्यमितिनम् ॥ १ ॥

परमार्थप्रकाशिका ७

पूर्वाध्यायेनेतिहृदयेचसकलेनेतिदेहकृत्स्नमेकांशेनस्थितोजगदित्यत्रके तर्हि
तादृशंरूपंकीदृग्विष्णोर्निरूपमपेक्षमाणोर्जुनःप्रार्थयतेदृष्ट्वे म

दनुग्रहायेति चतुर्भिः ममानुग्रहायशोकनिहतयेपरमेरहस्यंगुह्ये
गोप्यमध्यात्मसंज्ञितेआत्मानात्मविवेकरूपेदेहीनित्यमवध्यार्थमि
तिशास्त्रयाकेवलंमायन्नमितिशास्त्रमशातनमिदंविषमितिशा
स्त्रमोहमर्वभूतेष्वित्यादियद्वच[illegible]केनमेमोहोविगतः निःशेषो
गतः १

दत्तनालीटीका ८

पूर्वाध्यायेनानाविभूतीरुक्त्वाविष्टभ्याहमिदंकृत्स्नमित्यादिना
सर्वशापकमेश्वरंरूपमुक्त्वाऽपरमोक्तंठितस्तत्साक्षात्कर्तुका
मोजनःपृच्छतिमदिति पूर्ववद्दृष्टेकामज्ञानहीनमात्मज्ञानतद्रूपा
यकर्मसमाधियोगप्रतिपादकंपरमंगोप्यमात्मपरमात्मविषयका
दध्यात्मसंज्ञितंयद्वचस्त्वयोक्तंतेनवोधवादिविषयोमोहोपिनष्टः १

ऋषभदेवजयन्तीटीका ४

एकादशेविश्वरूपमर्ज्जुनायोक्त्वयहरिःतेनस्तुतःपुनःसोमस्वरूपो
भूदितीर्यतेदशमेध्यायेःआत्मानुजाकेशसर्वभूताशयस्थितः वि
ष्टभ्याहमिदंकृत्स्नमितिशापकमोपसंहाररूपाभ्यांचेतनाचेतनात्मकप्र
सर्वस्यजगतोभगवत्स्वरूपत्वेभगवन्मुखाच्छ्रुत्वातमेवविश्वात्मक
भगवत्स्वरूपेदृष्टकामोर्ज्जुनस्त्व सारथिभगवंतंपृच्छतिचतुर्भिः
मदनुग्रहायेतिममशोकमोहाद्यज्ञाननिहतयेपरमंप
रमार्थंगुह्यंसत्तदितरदेवाद्यगोचरं अध्यात्मसंज्ञितंदेहात्मविष
यकं अशेषज्ञानत्वशोचत्वमित्यादिदृष्टान्तकंनद्वचः यद्वाकान्त
यासर्वेश्वरेणसर्वज्ञेनमन्निमेत्तंलोकपूर्वकथितंतेनत्वयासममत्व
न्नसादत्तध्यात्मज्ञानस्यंवृद्धिस्थितोमोहोदेहएवात्मेत्याकारक
सर्वं आत्मविषयोभ्रमोविगतोविशेषणहरतोनिरस्तः २

मधुसूदनटीका १

पूर्वाध्यायेनानाविभूतीरुक्त्वाविष्टभ्याहमिदंकृत्स्नमेकां
शेनस्थितोजगत् इतिविश्वात्मकंपरमेश्वरं रूपंभगवतोतेभिदित्ते
ऽर्जुनउवाच
ऽकृत्वापरमात्मकंठितस्तत्साक्षात्कर्तुमिच्छन्पूर्वोक्तमभिनंदन् म
दनुग्रहायशोकनिहत्यैपकाराद्यपरमंनिरतिशयंपुरुषार्थंप्रका
शकंगुह्यंगोप्यंयस्मैविहृक्तमनद्दमपिश्रध्यात्मसंज्ञितमध्यात्मवि
षयकंअशेषज्ञानत्वशोचत्वमित्यादि
निर्देशेनात्मानात्मविवेकविषयमशेषाज्ञानत्वशोचत्वमकारणंकृत्वासर्वेश्व
रेणाध्यापयतातेनदत्तेनग्रन्थेनयत्वयापरमकारणंकृत्वा

नोक्तवचोवाक्येतेनवाक्येनाहमेषोहंनामयेतेहत्येतेनेत्यादिविवेक विपर्यासलक्षणोमोहोयमनुभवसाक्षिकोविगतोविनष्टः ममनत्व मसक्तदात्मनः सर्वविक्रियाभूम्नेनोक्तः १

सदानंदी टीका २ ११

सदालक्ष्यावासेसकलमुनिवंद्येसुविधौमहाभाग्येधैर्येविदलस करंदेसमतिदेविधीशाद्यास्वाद्यैकशयवसविक्रेतिपदमनोभृंग मेसश्रीहरिपदसरोजमविशत १ पूर्वाध्यायेविभूतीःस्वाःप्रोक्तातेप्रो क्तवानितिविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत २ इतिविश्वा त्मकंरूपंकृत्वाभगवतेरित तत्साक्षात्कर्तुकामःसमूढोक्तमभि नंदति २ अर्जुनोभगवद्वाक्यविश्वासेनायतः ममशोकनिवृत्त यैवाकोगोप्तृत्वयेरित ४ यद्यत्कृष्टफलंमोक्षपर्यवसायिसर्वथा आत्मानात्मविवेकैकविषयंसंशयापह ५ तेनमोहोविनष्टोमेद दायध्यासलक्षणः अशेषाध्यासबीजमित्यारभ्यविवेचनं ६ स ष्टाध्यायोक्तमेवोक्तंपदार्थंस्मृत्वतः तेनस्मृताहमेतेनेतेन मयेतिच ७ मोहोनष्टोक्रियंकृत्वात्मानमजरामरं नथेवस मग्राध्यायादारभ्यदशमांततः ८ तत्पदार्थोविनिर्णीतःश्रीहरे र्वेचुमाश्रितः कृत्स्नंपदार्थंविदेयत्मानमवद्यदायते ९ मायाद्यम यानीर्णीतेनैश्वर्येनेनविश्चिते १



नीलकंठी टीका १२

पूर्वस्मिन्नध्याये योगोविभूतिश्चाख्येयत्तेनप्रतिज्ञातोयतोविभू तियोगश्चममयोवेतीति आत्मनोयोगंविभूतिंचजनार्दन भूयः कथयेतीतरेणचश्रोतव्येनमार्थितो तत्राद्यमात्मायुज्ञाकेशव वंभूताशयस्थितइतिसंक्षेपेणयोगोभगवतःसर्वभूताधारत्वल क्षणरूपःप्रागेवभूतिकथनात् तदेतच्चविष्टभ्याहमिदंकृत्स्नम कांशेनस्थितोजगदितिकृत्स्नेनयाम्यमिवमयेदंजगदिष्टंयामि तत्साक्षणवस्मारितस्तदेवभगवतःसर्वभूताधारत्वंसाक्षात्कर्तु॰

कामोऽर्जुनउवाच मदनुग्रहायेति मयिअनुग्रहोनुकंपातदर्थंमदनु
ग्रहाय परमंसयःशोकमोहनिवर्तकत्वेनउत्कृष्टं गुह्यंगोप्यं अध्या
त्मसंज्ञितंआत्मानात्मविवेकाद्यैशास्त्रेअध्यात्मतत्संज्ञितं यत्त्वया व
चःअशेषाज्ञानत्वशेषरूपादिनाषष्ठाध्यायपर्यंतेवपदार्थशुद्धिप्र
याणेनायेहंतिनहंमनइमात्मनोःकर्तृत्वाभोक्तृत्वप्रतिपादकंते
नममोहःअविवेकोयविशेषेणगतोनष्टः अत्रअष्टमेषादेश्त
राधिक्यमार्षं॥ २॥

आनंदगिरीका

एवंचतत्रशमेश्वरस्यप्रकृतिपुरुषाधिष्ठानेनविश्वात्मनोविनिश्चि
त्यप्राप्तिनस्यकालस्वरूपस्यपरीप्सार्थमर्जुनउवाच अध्यात्मसंज्ञितंपर
मात्मविषयत्वत्तंयम् मोहोयमनात्मन्यात्मबुद्धिः १

रत्नकंठीका

अथाध्यायदशकेनभगवद्रूपदिष्टज्ञानविज्ञानश्रवंममस्नाभिधेयवस्तुश्र
वणमात्रादेवभगवतः परमेश्वरत्वावगमान्नस्यपरमकारुण्यत्वेनउक्तेव
चसिद्धयोक्तफलाविसंवादकतयाप्रकृष्टोपायत्वेनिश्चत्यसंदेहमात्मान
मावेदयंश्चतिमात्रप्रतिपन्नतत्साक्षादशनेर्व्यवहारिनोर्जुनउवाच मदनु-
ग्रहायमामनुग्रहीतुंनिजयापरशक्त्याप्रबोधयितुंतयापरमेश्वरेणस्वयं
प्रतिपादितस्वभावेनयद्वचनमध्यायदशकात्मकंवाक्यमध्यात्मसंज्ञितमा
त्मविषयज्ञानमयमनन्यपरमंगुह्यंप्रकृष्टंरहस्यमुक्तं मयादिष्टं तेनहेत
भूतेनायंसर्वज्ञनक्षीराकारणास्थितोमोहइतिप्रतिपादितपरमार्थप्रति
पत्त्यात्मयाप्रतीतिस्तद्रागमज्ञानंममविनष्टोव्यपगत[illegible] १

रामकृष्णकी टीका

एवंदशमेनाध्यायेनभगवन्मायावैश्वरयोगप्रवेशमोपादानभूताविभूतीः
सम्यक्श्रुत्वा अधुनाविस्तरेणात्मनोयोगंविभूतिंचेत्यादिनाष्टसप्तमि भ
गवतैकादशाध्यायेविवक्षितविषयानुत्तरितेमहात्मानिरूपमेश्वरयोगमोक्षा
लक्षणंस्वोक्तमभिनेत्रर्जुनउवाच मदनुग्रहायमामनुग्रहीतुंपरमंगुह्यंप्रक्
ष्टंरहस्यमध्यात्मसंज्ञितम आत्मनोपरस्वरूपस्यब्रह्मरूपतयानिर्लेपस्यापि
सतः मृगतृष्णाभावाधिष्ठानतिलाभाख्यमैश्वर्यापरपर्यायमहमिदमीत्यवेल्

गी टी प

ज्ञानेवा अहमादिर्देवानामहमेवसर्वप्रभवस्तादियद्वचस्त्वयासर्व
ज्ञोनोपदिष्टम् तेनस्तुतेनतायज्ञगद्वैचित्र्यविषयोमोहस्तस्यप्रतिपत्तिः
किंकारणाकमेनद्वैचित्र्यमित्येवंरूपोविगतेनष्टः [redacted] १।

पंजीटीका

विभूतिवैभवंशोचन्नथायोतेविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितो
जगत् इतिभगवतायज्ञगदात्मरूपसाध्यमैश्वरंरूपमभिहितंतत्सा
क्षात्किर्तुः पूर्वोक्तमभिनंदन् अर्जुनउवाच मदनुग्रहायेति हे॰
कृष्णत्वयामदनुग्रहायममानुग्रहार्थंयत्परमंनिरतिशयंगुह्यमध्या
त्मसंज्ञितंज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नंविष्णुस्वरूपवि
षयमात्मानात्मविवेकविषयंवचः वाक्येनोक्तेनममअयंमोहः
अविवेकः विगतः अपगतः १

रत्नदीपसंविद्योतिनी

भगवदुक्तियुक्तस्यरणवीरमहीभुजः आकल्पमस्तुतद्विश्वरूपद
र्शिनतःस्थितिः। अत्यनुकूलकरणविभूतिमद्भगवद्वाक्यश्रवणात्
स्वविषयेस्वधर्मानुकूलकृतार्थतांनिश्चित्येदानींप्रत्यक्षतयेश्वरंरू
पंदिदृक्षुरर्जुनःप्रार्थनापूर्वकमुपक्षोतेभगवंतंप्रत्याह मदनुग्रहा
येति मदनुग्रहायमच्चयद्योमदनुग्रहस्तस्मैनिमित्तभूतायाध्या
त्मंप्रत्यनुग्रहंकर्तुमध्यात्मसंज्ञितमात्मानंदेहमधिकृत्यसंज्ञि
तंचेष्टयाज्ञापितंसंज्ञास्थेतनानामहस्तायेर्थस्तूवनेत्यनुषगम
नायत्परमंपराक्कुन्मीलनायनेनेतिपरमंगुह्यस्वेतिवोदनाऽनुकूल
प्रतिपत्तयेरहस्यंवचस्त्वयोक्तमधुनाऽतेनवचसा कथंभीष्मंहंमि
त्येत्यनुकूलकरणाः प्रतिकूलव्यापारोयमेवमोहोविगतोमम
विमूढस्यापिमेविगतः अपाष्टोधुनेवसंजाताध्यात्मविवेकोहमस्मी
तिभावः ११

११

मधुभाष्य

भाषा अनुवाद

श्रीभगवान कृष्णचन्द्र अति कृपा करके अपनी विभूति का
विभव कहा और सो सुनि के दर्शनेच्छु अर्जुन का विषाद
दूर मिटे कुरुक्षेत्र में कौशेन स्थिती जगदिमादि श्लोक से भगवा
न ने विश्वात्मक परमेश्वर स्वरूप प्रसंग वशाते देखाया तो
अर्जुन भगवत पूर्व वचनों की प्रशंसा करते हुये अब पका
दश अध्याय के आरम्भ में चारि श्लोक से कहते हैं कि अशोच्या
नन्वशोचल्लमित्यादि दूसरे अध्याय के ग्यारह श्लोक से ले कर
छठवें अध्याय तक मेरे शोक निवृत्ति के अर्थ परमात्मनिष्ठ
अति गोपनीय आत्म अनात्म विचार के जो वचन आपने कहा
उन से हम हता ऐये शत्रु गण मारने योग्य ऐसो जो मेरी भ्रम
सो नष्ट हो गई क्यों कि आत्मा को कहिन आदि कुछ नहीं है
यह आपने कहा सो ठीक ही है ।

दोहा

मोहि अनुग्रहसेंपरमगुपनअध्यात्मनाम कहाजोतमनिहृ
वाकनेयह मम मोह निशान ।

भवाप्ययौहिभूतानां श्रुतौविस्तरशोमया ।
त्वत्तः कमलपत्राक्षमाहात्म्यमपिचाव्ययं २

शाङ्करभाष्यं १

किञ्च भवेति। भवउत्पत्तिरव्ययः प्रलयोभूतानां तौ भवाप्ययौ श्रुतौ विस्तरशोमया न मंक्षेपतस्तत्तत्तत्काशात् कमलपत्रात्त कमलस्य पत्रे कमलपत्रे तद्वत् अक्षिणी यस्य तत्र सत्ते कमलपत्राक्षः हेकमलपत्रात्त माहात्म्यमपि चाव्ययमत्त यं श्रुतमित्यन्वयेते २

आनन्दगिरिकृतटीका २

अविवेकबुद्धिरज्ञानविपर्य्यासात्मिका सप्तमादारभ्य तत्पदार्थनिर्णयार्थमपि भगवद्भक्तं वचोमया श्रुतमित्याह किञ्चेति तौ भूतानामुत्पत्तिप्रलयौ तत्तः श्रुताविस्ताभ्यां सम्बध्यते माहात्म्यं तत्त्व भावोमाहात्म्य पारमार्थिकं सोपाधिकं वा सर्वात्मतादिरूपं श्रुतमिति परिणम्यानुवृत्तिं योजयित्वा अपि चेत्यर्थः २

स्वामिकृतटीका ३

किंच भवाप्ययाविति भूतानांभवाप्ययौसृष्टिप्रलयौतत्तः सकाशादेवभवतइतिश्रुतौ मया प्रदर्शितत्वत्तोजगतःप्रभवःप्रलयस्तथास्थितौविस्तरशःपुनःपुनःकमलपत्रेइवप्रसन्नेविशाले अक्षिणीयस्यतवहेकमलपत्राक्षमाहात्म्यमपिचाव्ययमत्तयंश्रुते विश्वसृष्टादिकर्तृत्वेपि सर्वनियन्तृत्वेपिशुभाशुभकर्मकारयितृत्वेपिवधमोक्षादिफलदात्रत्वेपि अविकारवैषम्यासंगोदासीन्यादिलक्षणमपरिमितंमहत्त्वंचश्रुते श्रवणेऽत्रिमापत्रेमन्येतेमया तत्तमिदंसर्वंनचमोतानिकर्माणिनिबध्नंति समोहंसर्वभूतेषुइत्यादिना अतस्तत्परत्वेत्रत्वादपिजीवानामहंकर्तृत्वादिमदीयोमोहो विगतइतिभावः २

वेङ्कटभाष्यम् ४

भवाप्ययौउत्पत्तिप्रलयौ २

रामानुजभाष्यम् ५

भवाप्ययाविति नयाम्बुजमप्रभृतिदशमपर्यंतेनत्वच्चतिरिक्तानां
सर्वेषांभूतानांतत्तः परात्मनोभवाप्ययावुत्पत्तिप्रलयौविस्तरशोम
यासुतौदेकमलपत्रायतनेत्रेत्यादिनानिमेषेतनाचेतनवस्तुशेषितेत्ता
नवत्वादिकल्याणगुणैस्त्वैवपरतरत्वेसर्वाधारत्वेचिंतनमिमिषि
तादिप्रवृत्तिसुतवैवभर्तृपितृत्वमित्यायपरिमितेमाहात्म्यवपुषे
हिशङ्खोवत्समाणादिदत्तायोत्तनाथैः २

अभिनवपुष्पकलतीका· ४

स्पष्टार्थं २ ॥ ॥ ॥

परमार्थप्रकाशीका· ७

भवाप्ययाविति तत्तत्तः सकाशाद्भूतानांभवाप्ययावुत्पत्तिप्रलयौ
मुद्देकात्तत्सजगतःप्रभवःप्रलयश्चत्यादिनाक्रमेणविस्तरशोविस्तरेणाम
यासुतौ अव्ययमविनाशिमहात्म्यसामर्थ्यमपिश्रुतौविश्वसृष्टादि
कर्तृत्वेपिकर्तृत्वेसर्वनियंतृत्वेपिसंगत्वेविचित्रफलदात्वेदासीनत्वत्त
णमाहात्म्यमित्यर्थः २

वनमालीटीका· ६

भूतानांभवाप्ययावुत्पत्तिप्रल योनतयवभवेतोत्तत्पवविस्तरशो
मयाश्रुतौनत्तमेतेणामकृदित्यर्थः कमलस्यपत्रेइवदीर्घेरक्षो
तेयस्मे अतिशोभायस्यसत्तेदेकमलपत्रात सौंदर्यातिशयोक्तिरियंप्र
मातिशयात् नकेवलंभवाप्ययौतत्तः श्रुतौ माहात्म्यंनिरतिशयैश्वर्यं
सृष्टादिकर्तृत्वेपिविकारित्वेशुभाशुभकर्मकारयितृत्वेपिवैषम्यम्
वैघृणादिविचित्रफलदात्वेपिदासीन्यमप्यदोषमहत्त्वात्तत्ता
दिप्रयुक्तकार्यकर्तृत्वादिकमप्ययंसदेकाकारं तत्तः श्रुतम् २

कमलवज्रयन्तीटी· ४

किंचभवाप्ययाविति देकमलपत्रायतनेकमलपत्रस्येवरम्येदीर्घेरक्षोत्ते
तद्विशालेनेत्रेयस्यसतथातत्सबोधनेदेकमलपत्रनेत्रेत्यनेनभगवः
तोनिरतिशयत्वेनयाथार्थ्योपदेशात्तनिरतिशयसौन्दर्यप्रतीत्यानप्रमाण्य
दर्शनेनसूचितम् ततःसर्वेश्वरत्वेसिद्धेसत्यभूतानांब्रह्मादिस्थावरान्ता
नांसर्वेषांचेतनाचेतनात्मकानांभवाप्ययौसर्गप्रलयौविस्तरशोऽस

कृत्स्नयात्स्कृपाधारेणश्रुतोसप्तमारभ्यदशमाध्यायपर्यंतेन
ग्रंथेनविशेषेणपालनमपिश्रुतंचपुनस्तवाद्ययेनिमंमाहात्म्य
महानंतगुणशक्तियुक्तआत्मास्वरूपंयस्यसमहात्मानस्त
वभावोमाहात्म्यंनिरतिशयपरमैश्वर्यंविश्वसृष्टादिकर्तृत्व
प्रविकारित्वंस्ववैशुभाशुभकर्मकारयित्वेपितत्तत्कर्मापृष्ट
त्वेनसत्कर्मानुगुणंदेवतिर्यंगादिविचित्रयोनिप्रापकत्वेच
षम्येनैघृण्यादित्वंसर्वोत्तमत्वादिकमपिमयाश्रुतमि
मर्षीः २

मधुसूदनीटीका २०

तथासप्तमादारभ्यदशमपर्यंतेनतत्पदार्थंनिर्णीयप्रधानमपि
भगवतोवचनेमयाश्रुतमित्याह भूतानांभवाप्ययौहिसर्वस्यप्रति
सर्गोत्पत्तिप्रलयौविस्तरशोमयाश्रुतौनत्वंतेपद्मपलाशकदिमर्षेः
कमलस्यपत्रइवदीर्घैरक्षिभ्यांतेपरममनोरमेभ्यांस्तिग्धंयस्यतव
सर्वेहैकमूलपत्वात्तत्रनिर्मोदयोनिशयोज्ञेयोयोमानिशया
त् नकेवलंभवाप्ययौत्वत्तःश्रुतौनत्वमहात्मनोभावोमहात्म
मनंतिशयैश्वर्यंविश्वसृष्टादिकर्तृत्वेप्यविकारित्वंस्वशुभाशुभ
कर्मकारयित्वेपिश्रवैषम्यंवैषम्योदाविविचित्रफलदात्वेपि
श्रसंगौदासीन्यमप्यदपिसर्वोत्तमत्वादिसोपाधिकंनिरुपाधिक
मपिचाद्ययमत्तर्यंमयाश्रुतमितिपरिणतमनुवर्तनेनेवकारा
त् २

मधुसूदनी टीका २१

भूतानांजन्मविलयौविस्तराद्भवतःश्रुतौ पद्मपत्रविशाला
क्षतवैश्वर्यमपिश्रुतं १ विश्वसृष्टादिकर्तृत्वेप्यवि-
कारित्वमात्मनः शुभादेःकारयितृत्वेपिवैषम्यंमहे-
शितुः विचित्रफलदातृत्वेपौदासीन्यमसंगता इत्या
दितवमाहात्म्यमत्तर्यंचश्रुतंमया २ २ ॥

नीलकंठीटीका २२

भवेति तथासप्तमाध्यायमारभ्यदशमपर्यंतेनतथाभूतानांभवा
प्ययावपिउक्तौयद्यस्मात्सर्वस्यप्रभवोमत्तःसर्वंप्रवर्ततइति भाव
पिमयाविस्तरशःतत्तःश्रुतौहेकमलपत्रात्त श्रव्ययमाहात्म्य

मपि नत्वमा नैतिकर्मणि दिं येतीति विषमसृष्टिकर्तरपि वैषम्य
नैर्घृण्यदोषोनास्ति जगत्कर्तरपि विकारगोचोनास्ति इत्येवमादि
रूपेतत्प्रदर्शनार्थमुक्तमित्यनुषंगः २

ज्ञानेश्वरीटीका

तत्तः परमकारणादेकस्मात्सर्वेषांभूतानामुत्पत्तिप्रलयौमयावि
स्तरतः श्रुतौ श्रवणमननलिंगमाहात्म्यपरमव्यापकत्वमपिविभू
तिलक्षणमुक्तम २

रामकंठीटीका

प्रत्रहेतुमाह— यस्मात्ततः परमकारणादेकस्मात्समस्तानेस्थावरजंगमभूतानां
प्रभवाप्ययावुत्पत्तिप्रलयौविस्तरतोवेत्तत्तेनमयाश्रुतौश्रुतिमात्रे
णाप्रतिपादितत्वेनवधारितावपिचाद्ययेनित्येमाहात्म्यनिरतिशा
यामन्तःपतंरेतात्किंविरम्तीत्यादिरविसंवादिनोभगवद्वचना
देवभगवानेवमकलभूतभाव कारणं तथाभावेपिविशुद्धवि
न्मात्रस्वभावाप्रच्युतेरद्भुतसैश्वर्यस्यैकास्पदमितिचमयाप्रतिपन्न
मित्यर्थः

२

रामसिंहकी टीका

मोहापगममेवाह— भूतानांस्थावर जंगमात्मकानामुत्पत्तिविलयौयतः सकाशा
देवभवतः इतिसर्वेभूतानिकौंतेयेत्यादिनाविस्तरेणमयाश्रुतौ
श्रुतिमात्रेणावधारितौनत्वनुभूतौ तथाह्ययेजगद्विततृपे
रेतावभासेसत्यपि इणीदंत्वलक्षणंस्वभावाप्रच्युतिरेवेने
माहात्म्येव्यापकत्वेचविशेषाद्रमिदंकृत्स्नमित्यादिनाश्रुतम् ने
तस्मादात्मतम

२ ॥

पंचोलीटीका

किंच भवाप्ययाविति हेकमलपत्राक्षहियस्मात्मयात्वत्तः भूता
नांभवाप्ययौभवउत्पत्तिरप्ययः प्रलयस्तौत्वत्सकाशात्विस्तरे
णश्रुतौचश्रुतत्रश्रवयमनेनमाहात्म्यमपिश्रुतं २ ॥

भवाप्ययाविति द्विप्रहोत्रवाक्यावधारणेकमत्यपत्राक्षेतिमंबोध
नमनुग्रहसूचनार्थंमयानभूतानामुत्पत्रवस्तूनांभवाप्ययावुत्प
त्तिविनाशौत्वत्तस्त्वत्तोश्रुतावेवाधुनाश्रयदव्ययंमादात्म्यंतद
पिश्रोतुमिच्छामीतिशेषः २॥

मधुभाष्य

२॥

भाषा अनुवाद

और भूतों की सृष्टि तथा प्रलय भी आपही से होती यह भी मैं ने विस्तार से सुना और हे कमलपत्रात श्रीकृष्ण आप का अव्यय रूप अक्षय माहात्म्य भी आपसे सुना इस से अब जीव सकल आपके अधीन हैं यह आना और यह कर्ता भोक्ता इत्यादि रूप मेरा मोह सम्पूर्ण दूर हो गया २

दोहा

अयति लय सभभूतकी सुनीविस्तारसें मेंइ तोसें पद्मदलन
यन पुनमहात्म अव्ययरूइ २

7

एवमेतद्यथात्थत्वमात्मानंपरमेश्वरं द्रष्टुमि-
च्छामि ते रूपमैश्वरंपुरुषोत्तम ॥

शाङ्करभाष्यम् १

एवमिति एवमेतन्नान्यथा यथा येन प्रकारेणात्थ कथयसि
त्वमात्मानं परेश्वरं तथापि द्रष्टुमिच्छामि ते तव ज्ञानैश्वर्यशक्ति
बलवीर्यतेजोभिः संपन्नमैश्वरं वैष्णवं रूपं पुरुषोत्तम ॥

आनन्दगिरिकृतटीका १

नन्वकेवैः विश्वासाभावात् न तस्मिन् दृष्टता किन्न कृतार्थो
ऽभूषया इत्याह एवमेतदिति येनप्रकारेण सोपाधिकेन नि-
रुपाधिकेन चेत्यर्थः यदिममात्मानं तस्मिन् महाकोशेनात्मानं न
हि किमिति मन्यसे कृतार्थोऽभूषयेत्यतः कं मत्वाह तथापीति च
तुर्भ्यादिरूपनिह्नवार्थमाह ऐश्वरमिति तच्चाचष्टे ज्ञानेत्यादिना
॥

स्वामिकृतटीका २

किंच एवमिति भवाप्ययौहिभूतानामित्यादिमयाश्रुतं यथात्थ
त्वमात्मानंत्वमात्म विषयभाहमिदंकृत्स्नमेकांशेनस्थितोजगदि
त्येवंकथयसि हेपरमेश्वरएवमेतत् अत्राप्यविश्वासोममनास्तीम
र्थः तथापिहेपुरुषोत्तमतवैश्वरंज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः से
पन्नंत्वद्रूपंकौतूहलादहंद्रष्टुमिच्छामि ॥

वेङ्कटभाष्यम् ४ टी.

एवमिति ईश्वरस्येदमैश्वरं ॥

रामानुजभाष्यम् ५ टि.

निपुः एवमिनिहेपरमेश्वरएवमेतदिपुरुषोत्तमतदसाधारणंसर्वस्मात्प्रशा- मन्यसे
स्त्रतेपालयितृतेसंहर्तृतेसर्वकारणगुणाकरतेपरतरतेसक
यत्तमिः लेतरविसजातीयंस्वभूतंयथात्थमात्मानं त्वमीक्षितुमिच्छामि
रूपंरहस्यसाक्षात्कर्तुमिच्छामि ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ॥ ॥

परमार्थप्रपाटीटीका ७

एवमिति विष्टभ्याहमिदं कृत्स्नमिति दानीमात्मानं तदात्मत्वहृत्वमि
एतत्तेऽस्वज्ञानेश्वर्यशक्तिबलवीर्यतेजोभिस्तपन्नरूपंदृष्टमिच्छामि
पुरुषोत्तममिति संबुद्ध्याऽलौकिकदर्शनकौतूहलेदिदृक्षालीतिसूचि
तं मुनिरपिवामदेवेनसाम्नोपदिशति कथानश्चित्राभवदूतीस
राहथःसलोकपाशविष्टयाहृतेति भाष्ये वामदेवः सदंहथःसदा
वर्धमानःसमष्टिरूपःपरमात्माचित्राश्रापनीयःपूजनीयःपद्धाविधि
त्राकृतिमयःसखामित्रभूतः परमात्माकयाऊती ऊत्यासतर्पणेनत
पाकयाशविष्टयाप्रज्ञावन्मनसायाप्रज्ञासहितमनुष्टीयमानेनकया
हृताकेनवर्तमानेनकर्मणावानोस्मानाभुवत् प्राभिमुख्येनभवे
त् अत्रभवार्गेचरोभवेदित्यादिवाक्येरेतादृशंप्रश्नंवेदापिवामदे ६८
वस्यमनोरथंप्रकटीकरोति किंपुनरहमित्यर्थः तदुक्तंहरिवंशे भा
रतेसावमासीनंविदुरेणजनार्दनं वामदेवभरद्वाजौदृष्ट्वाप्रीतोजग
न्मये नावावायोतोममालोकविज्ञायचतत्रीमिते उभयोर्दर्शयामा
सविश्वरूपंस्वकीयं तत्स्वाङ्गचतः कृत्स्नंसर्वदेवात्मकंविभुं
तमादिः सर्वभूतानामध्यमंतत्स्वयंभवान् यमेववृत्रजानाति
लोकदृष्टानिमाधव नवगात्रेषुपश्यामित्रेजोःसर्वदेवताःजि
नष्टुरिष्टवतः प्रीतादातायोगेश्वरेश्वराः तामीदृशंते ॥ (पश्यंतिनान्य
श्चेवविश्वदेइति अथवामदेव्यस्यसाम्नः प्र. हरिवंशपर्वणिभरद्वाजाख्याया विश्वेभिर्देवैःदृतमाजयामिजाग+

वत्समती टीका- ६

देवपरमेश्वरयथायेनप्रकारेणावदनवं पटीयोनिरतिशयानेनैश्व ६८
र्येणात्मानंतमात्मकथयसिएवमेतन्नान्यथातद्वचसिकृत्वापिमम्
विश्वासशंकानास्तिवयंयपिशास्त्रदृष्ट्यात्मानंतथापिचत्त्वाद्दृष्टु
मिच्छामि तेतवरूपमैश्वरंतेनैश्वर्यशक्तिबलवीर्यतेजोभिःसंप
नमद्वतेरूपमसंवाधनेनसर्वनर्यामिन् तद्वचस्यविश्वा
सोनास्तिममदिदृक्षावास्तिमदर्थमितिसंबंधतात्पर्यं
वर्णयति १

क्रमसंबंधयन्नीटीका १

किंच एवमेतदिति देवपरमेश्वरचेतनाचेतननियंतृयथातेसम
मतिस्तथात्मानंस्वमात्मविष्टभ्याहमिदंकृत्स्नमित्यादिनाब्रवीषि
तेतदेवमित्येवममात्मनात्मविश्वासस्तथापिहेपुरुषोत्तम
प्रपन्नजनवात्सल्यादथेतरेमेश्वरस्यतवैश्वरंजगत्स्थादिकर

+ तेनछंदसासप्तदशेनस्तोमेनवामदेवेनसाम्नावद्वारेणवज्रेनेति यत्रसामगायनेस्तोमस्तोभादिस्त
त्राणमस्माभिःसामवेदभाष्येश्लोकं तंजेवभरद्वाजोपि कर्मणाफलदानाचफलदःकर्मजंवेत्ति विदे
ह्राहृष्टसत्त्वानांग्रहदेत्योपरतसामिति ऋतिरपि रक्षोऽक्षणमितिहेतुनैतदपेक्षतिनिरूपयिष्यते ॥ ॥+

त्वेपिसर्वनियंतृत्वेपिसर्वभर्तृत्वेपिसर्वप्रशास्तृत्वेपिस्वाभाविकानव
कल्याणगुणगणवत्त्वेनानन्तशक्तित्वेनचसकलचेतनाचेतनविसजातीं
यंतदसाधारणंरूपंविश्वरूपंद्रष्टुंसाक्षात्कर्तुमिच्छामि तवनिरतिश
यानंतज्ञानैश्वर्यादियाथात्म्यतत्त्वेननिखिलचिदचिदात्मकत्वेनचनिरवधि
कातिशयानंताचिन्त्यगुणशक्तिकेयोगिध्येयंस्वयंनराणांगोचरंयत्त
द्रूपंतद्दर्शनायात्वत्तस्समभेच्छाप्रवृत्तासाचेन्निराशास्यान्नर्हितव
भक्तकामपरिपूरकत्वाभावनसेत्यस्मत्तस्तेनोमदीक्षायतो प्रार्थ
यामीतिसम्बोधनयोरभिप्रायः १

मधुसूदनी टीका· १०

हेपरमेश्वर यथायेनप्रकारेणसोपाधिकेनवनिरतिशयेश्वर्येण
त्वमेवमात्मकंयसि एवमेतन्नात्यथा तद्दृच्छसिऊर्जापिममावि
स्वासशंकानार्हवेत्थंः यद्यप्येवंतथापिकृतार्थीकुभूषयाद्रष्टुमि
च्छामितेतवरूपमेश्वरंज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नम
द्भुतंदेवकुरोत्तम संबोधनेनत्वद्दृच्छसिश्रविश्वासोममनास्तिदिष्टा
वमहतीवर्ततइति सर्वज्ञत्वज्ञानानासिसर्वांतर्यामित्वाद्वेत्सिसूच
यति॥

सदानंदी टीका· ११

यथायेनप्रकारेणपरमेश्वरमात्मनेसोपाधिकात्मनानद्दृक्निरुपाधि
करूपतः १ परंमेश्वर्यसंपन्नेस्वात्मानंकथयस्येवमेवैतत्सी
द्दृनास्तिशंकामनागपि २ यद्यप्येवंतथाप्यद्दृकृतार्थीकुभूषया
द्रष्टमिच्छामितेद्दृंज्ञानैश्वर्यादिसंपन्नम् ३ सर्वशक्तास्त्रयंश्रीम
न्परमेश्वरमद्भुतं नद्दाकोनास्तिविश्वासोदिष्टत्तामहतीवमे ४ अं
तर्यामितयावेत्सिपुरुषोत्तमचांतरे ५ १

नीलकंठी टीका· १२

एवमिति यद्यत्तेविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदिति
आत्मानंजगदाधारमात्यतदपिइत्थमेवनममाज्ञासंभावनास्ति

हेपरमेश्वरनेनवरूपंपेश्वरंईश्वरस्यदेविश्वात्मकेमायामयमिम
र्थः हेपुरुषोत्तमत्वत्तोन्यत्तत्तत्तीत विश्वरूपेमायामयेवास्तवंनरूपं
मयातीतमित्येश्वरमितिपुरुषोत्तममितिचपदाभ्यांलभ्यते तथाच
वक्ष्यति मायाह्येषामयासृष्टायत्मोपश्यसिनारद सर्वभूतगुणै
र्युक्तंनैवंमोह्यतमर्हसीति उक्तंच मुहंरूपमभिप्रेत्यश्रवाक्यो॰
यमर्चित्योयमिति ३

श्रानंदटीका

अतींद्रियत्नवात्माक्रतपवाकिंततवैश्वरंरूपंसर्वभूतनिवासात्मि
कोदिव्यामूर्तिद्रष्टुमिच्छामि ३

क्रतिमात्रेणेतन्मयाप्रतिपन्नंनृतृसा **रामकंठीटीका** लादन्नभूतमितितदर्थीमाह॥
यथायेनप्रकारेणात्मानंईश्वरंनारायणंवोमात्रेणा
नामयीश्वराणामीशित्वात्सर्वंप्रभमाथकथयस्येतद्वैस्वमने
नप्रकारेणास्थितेनात्रमेभ्रांतिरित्यर्थः ततएवतेरूपंदिव्यंवपरैश्वर
मीश्वरमात्मवंवत्यिद्रष्टंसाक्षात्रिरूपयितुमिच्छाम्यभिकांक्षामि
अनेनत्वयुनाद्दश्यमानेनपुरुषाकृतिनारूपेणात्मरंरूपंवोमात्रेणा
ममकायितेकेवले यत्रेदमेकस्मिन्सर्वमेवस्थितेनदिदानींभगवद्
वनप्रत्ययान्मयातत्तस्थाविद्यमानतयाप्रतिपन्नमतःपुरुषोत्तमप
रमपुरुषत्वत्वसादात्तत्वत्तःप्रेक्षितुमभिकांक्षामि ३ ॥

यथत्मात्कार्यीमत्रमि लासिकी [illegible]टीका
निर्वमाह॥ हेपुरुषोत्तम यथायेनप्रकारेणात्मानमेश्वरंरूपमाश्रकथयसि प
रंवाछमनेनप्रकारेणैतत् नात्रमेविश्वासाभावः तथापितवैश्वरंरू
पंसाक्षात्कर्तुंस्पृहयामि ३

पंचोत्तीटीका

पूर्वोक्तमभिनेयस्वाभिप्रायंआविष्करोतिएवमिति हेकृष्णहेपरमेश्व
रयथात्वमात्मानंनित्यमुक्तस्वभावपरमेश्वरमात्मानमा
त्मकथयसिएतत्एवमेवनान्यथाहेपुरुषोत्तमतेतवैश्वरशक्ति॰
वीर्यबलतेजोभिःसंपन्नंरूपंद्रष्टुमिच्छामि ३ ॥

एवमेतदिति परमेश्वरतंत्रस्वात्मानमात्मीयंस्वरूपं यथात्यक्षयसि तदेतदेवमनेनैवप्रकारेणानिर्णीतं भवतीतिशेषः संप्रतिचक्षुरुन्मीलनेपेक्षारूपंदृष्टमिच्छामीति ३॥

सप्तभाष्य

३॥

और जो आप ने सप्तम अध्याय मे कहा कि भूत सृष्टि तथा प्रलय आदि कार्यों का कारण मै हूं और दशम अध्याय के अन्त मे कहा कि विष्टभ्याहमिदं कृत्स्न मेकांशेन स्थितो जगदिति और अब भी जो रूप आप आपना कहते हो यह सब ऐसा ही है इसमे हमे कुछ सन्देह नहीं है तो भी हे पुरुषोत्तम ज्ञान ऐश्वर्य बल वीर्य श्री तेज से सम्पन्न कहे पुरुष तुम्हारे रूप को अति आश्चर्य मे मै देखने की इच्छा करता हूं ३

दोहा

ऐसें जो तुम यह कह्यो आत्म कहूं भगवान देखा चहों पुरुषोत्तम तो ईश्वरूप महान ३॥

मन्यसे यदितच्छक्यं मया द्रष्टमितिप्रभो योगेश्वरततो मे त्वंदर्शयात्मानमव्ययं ४

शाङ्करभाष्य २

मन्यस इति मन्यसे चिन्तयसि यदि मयार्जुनेन तत् शक्यं द्रष्टमिति प्रभो स्वामिन् योगेश्वर योगिनोयोगास्तेषामीश्वरोयोगेश्वरः हेयोगेश्वर यस्मादहमतीवार्थी दृष्टे ततः तस्मात्मे मम मदर्थं दर्शयत्वमात्मानमव्ययं ४

आनन्दगिरिकृतटीका २

दृष्टमयोग्ये कृतो दिदृक्षेत्याशंक्याह मन्यस इति प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनेभ्यः इति प्रभुः लक्षणया योगशास्त्रार्थमाह योगिन इति तत इत्यादि आवेष्ट यस्मादिति ४

स्वामिकृतटीका २

नचाहंदृष्टमिच्छामिइत्येतावतैवतवयात्मरूपंदर्शयितव्यं किंतर्हि मन्यसइति योगिनएवयोगास्तेषामीश्वरमयार्जुनेनतत्रूपंदृष्टं शक्यं यदिमन्यसे ततः तर्हितत्रूपंपरमात्मानमव्ययंनिजंममदर्शय ४

वैशाववभाष्यटीका ४

मन्यसइति योगशास्त्रान्तमाधिवचनादर्शनादित्वादवप्रत्ययःयोगोविद्यतेयेषांतेयोगाः योगिनामीश्वरोयोगीश्वरस्तत्सम्बोधने ४

रामानुजभाष्यटीका ५

मन्यसइति ततस्वंमत्तदृष्टप्रशान्तसर्वस्वाधारभूतंत्वरूपंमयादृष्टंशक्यमितियदिमन्यसे ततोयोगज्ञानादिकल्याणगुणयोगःपरमेयोगमेश्वरमितिहिवदन्तेतच्चातिरिक्तस्वकल्याणसंभावितानन्तज्ञानबलैश्वर्यवीर्यशक्तितेजसोनिधेआत्मानंतवा मव्ययंमेदर्शयत्रत्वयमितिक्रियाविशेषणं तेसकलेमदर्शयेत्यर्थः

अभिनवगुप्तकृतटी ६

स्पष्टार्थं ८

परमार्थप्रपाटी काटी ७

[illegible]

ग्रथैतद्रूपदर्शनेकेवलमनुग्रहैकलभ्यमित्याह मन्यसइति योगेश्व
रयोगिनएववयोगास्तेषामीश्वरतनत्वहि ग्रतोमात्मानंदर्शय ४ श्लो.५.

वनमालीटीका. ८

द्रष्टुमयोग्येऊतस्तेदिदृक्षेत्या शंक्याह मन्यसइतिप्रभवतिस्रष्टुंस्थि
तिंसंहारंप्रवेशंप्रशासनेहितिप्रभुः हेप्रभोसर्वस्वामिन्ततनवैश्वरं
रूपंमयाद्रष्टुंशक्यमितिमन्यसेजानासीच्छसिवाहेयोगेश्वरसर्वेषा
मणिमादिसिद्धिप्रदानेनोयोगानांयोगिनामीश्वर ततस्त्वदिच्छाव
शादेवमेमत्समत्यंमप्यर्थिनेनेत्वरमकारुणिकोदर्शयचात्मस्व
कीयंरम् ४

ऊसमवेतयत्नीटीका. ५

ननुबलादिभिर्दैवैरपियद्रष्टुमशक्यंसाधनसम्पन्नैर्योगिभिस्तापि
यद्रष्ट्राप्तेनतत्रसाधनेविनाकथंद्रष्टुमिच्छसीतिवेत्राह मन्यसेयद्य
दीति प्रभवतिस्रष्टुंस्थितिंसंहारंप्रवेशंप्रशासमर्थोभवतीतिप्रभुः
ततस्तंबुद्धेहेप्रभोसर्वस्वामिन्त्रिजनेनभगवतःकर्हचेकारयित्वेत
यिचेदितासम्बुद्धेसूचितेयदिमयाऽस्मत्तेनसाधनहीनेनतत्सर्वैस्
ष्टुंसर्वतियेत्समर्थाश्रयमयंतद्रूपंद्रष्टुमवलोकितेशक्यमदर्शन
योग्यंभवेदितितेमन्यसेनानासीच्छसिवातत्तस्हि हेयोगेश्वरयोग
शब्दोऽत्रानेतज्ज्ञानेश्वर्यादिकल्याणगुणयोगःयस्यमेयोगमैश्व
मितिवक्ष्यमाणत्वात् हेज्ञानैश्वर्यादिनोवीर्यबलतेनादिशब्दादिज
लधेरप्यनेनतत्रातिरिक्तानांविभूतीनांदयादीनांकेषामप्येतद्योगाभ्यु
पगमेकिंतत्तमेवसर्वैस्वरोऽसीतिसूचिते श्रद्धयेतिपैकार
संक्रियाविशेषणंवा सकलेतरविसजातीयंयथास्यात्तथा श्रात्मा

नेस्वेत्वंमेमत्समत्सर्वंमर्थिनेपरमकारुणिकस्त्वंदर्शयचात्मस्व
ज्ञानविषयीकारयत्वदन्यंहिविनात्वद्रूपदर्शनेत्वत्प्रसादोपिदेवा
नमसमर्थोस्तत्कथयास्मीभूदपप्रसादोपिसमर्थोभवेत्तस्मि
न्मसमयदियोग्यतास्तिनर्हिदर्शयेत्यभिप्रायः ४

दृष्टमयोपेक्षतस्तेदिदृक्षे मधुसूदनीटीका २

त्याशंक्याह मत्सर्वोभवति प्रभवतिस्थितिसंहारप्रवेशप्रशासनेषु
तिप्रभुः हेप्रभोसर्वस्वामिन् तत्तेवैश्वरंरूपंमयाज्ञेनेनदृष्टंशक्ष्य
मितियदिमन्यसेज्ञानासिद्ध्यसिवा हेयोगेश्वरसर्वेषांमणिमा
दियोगिनांशास्त्रिनांयोगानामीश्वरतत्तस्यदिदृक्षावद्दर्शनेवमेमत्र ४
मत्सर्वंमर्थिनेतेपरमकारुणिकोदर्शयचात्मस्वज्ञानविषयीका
रयआत्मानमेश्वरंरूपविशिष्टमव्ययमत्यर्थं ४

सदानंदी टीका २१

स्रष्टृस्थितिलयादिभ्यःप्रभुःप्रभवतीदृशः हेप्रभोसकलस्वामि
न्रूपंयत्तत्तवैश्वरं २ मयाज्ञेनेनशक्यंचेद्दृष्टंचिंतयसीश्वर हे
योगेश्वरसर्वेषांयोगिनांसिद्धिशालिनां २ योगानांचैवसर्वेषा
मीश्वरोसिस्मरायते त्वदीयेच्छावशादेवमसमर्थोसिनेविभो २
आत्मानमैश्वरंरूपमत्यंककरुणानिधे चात्मस्वज्ञानविषयीकार
यत्वमिहाधुना ४॥ ४

नीलकंठी टीका २२

मन्यसइति हेयोगेश्वरयोगानांयोगिनामीश्वर तद्रूपंयदिमया
द्रष्टुंशक्यमितिमन्यसेयदियोग्योनाधिकारेणप्यसितत्त
र्हिमेसम्यक्प्रत्ययंमायामयंआत्मानंदर्शय मायामयत्वादेवास्या
यते मायायोहिसर्वेसर्वात्मकेसर्वदाक्षीणसिद्धं यद्योकल्प
सिष्टेन वर्तमानमतीतेचभविष्यत्कल्पमपिवा तथाहरमहरे
चनिमेषःकल्परूपोपि विदात्मनिस्थितोमेवरूपमायाविरचि
तमिति नहिमरुमरीचिसरीसृपशःसृप्यति अतोमायामयत्वा
देवास्यैश्वरस्यरूपस्यास्तियते ४

आनंदटीका

योगीश्वरमहाविदेहाद्यायोगसिद्धासयसर्वेजगत्कर्तृसमर्थंप्रत्य
यमात्मानमनादिनिधनंस्वरूपम् ४

रामकंठटीका

किंत हेप्रभोपरमेश्वरतत्रयाविधेतादृशंरूपंपरमयोगिभिरपिशार्यीमा
नदर्शनेमयामनुष्यमात्रेणाद्रष्टुंसाक्षात्त्रिस्तिंशकोसहमितियदिम
न्यसेजानासि यदिमेयतीयोगपतोसंभावयसितत्तस्त्वयोगीश्वरस
दृजसिद्धनिरतिशययोगत्वात्प्रयत्नसाध्ययोगानांसर्वेषांयोगी
नराणांप्रभोमहत्तमंप्रत्यमनादिनिधनमात्मनंस्वरूपंदर्शयप्रत्य
क्षीकुर्वित्यभ्यर्थितःप्रसादाभिमुखोभगवानुवाच ४

लासिकी [illegible]टीका

किंत हेप्रभोईश्वस्वामिन् भोयोगेश्वरबुद्धियोगमारभ्यज्ञानयोगपर्यंतेयथो
पपत्तियोगंदातंसमर्थं श्रममर्थंप्रतिहियंचैवब्रूषेतिसाकृतमामं
तंईशंरूपंमयामनुष्यगालज्ञानमात्रबोधेनद्रष्टंसाक्षात्कृ
र्यमि तेतामहत्तमंप्रत्यं योक्तमात्मानंदर्शयप्रत्यक्षीकुर्वित्येवमभ्यर्थि
तः प्रसादाभिमुखः ४

पंचोलीटीका

नकेवलंममरूपत्वयादृंत्वयादर्शयितव्यंमदीयमधिकारित्वेवा
पेक्षणीयमित्याह मन्यसइति हेप्रभोयदितदैश्वरंरूपंमयाद्रष्टुंश
क्यमितिमन्यसेहेयोगेश्वरयोगाःयोगिनस्तेषामीश्वरस्तत्तत्वेमम
तंआत्मानंदर्शय ४

रणवीरसिंहोथिनी ॥

अहोभगवंतंस्वामिन्हीत्यविश्वरूपंदर्शयितुमभ्युपगमयति मन्य
सेइति प्रभोसंबोधनंसर्वशक्तिमत्वद्योतनार्थंत्वयायदिमन्यसेमहिष
योग्यतंवेजानासि तत्स्वरूपंद्रष्टुंसाक्षात्करवायदर्शयितुंमयानेनेनप्रा

कामिति ततस्तदियोगेश्वरं भगवन्तमात्मानंस्वरूपमव्ययंसनातनं
मेमसंदर्शयेतीत्यंप्रार्थनाएवंप्रस्तुतो भगवानुवाच पश्यमेः
ति ४ ॥

मधुभाष

यथाश्रुतेध्यानंप्रकारंतथास्वरूपस्थितिरूपेनाध्यायेनोच्यते
प्रभुःसमर्थः नास्तितस्मात्परंभूतंपुरुषाद्वैसनातनादिति
मोक्षधर्मे प्रभुरीप्रः ॥

भाषा अनुवाद

और मेरी इच्छा है देखने की इस हेतु आपको अपना रूप देखावना उचित है यह कुछ बातनहीं है परन्तु हे योगेश्वर जो यह आपका ईश्वर स्वरूप हमारे देख नयोग्य होय और हम देख सकैं तो हे प्रभो वही अव्यय स्वरूप अपना हमें कृपा करि दिखावो यह अर्जुन ने क हा ४

दोहा

जो प्रभुमानत योग्य यह देखनको मोहि याहि तो मोह योगेश्वा
हम आस अव्यय देखाहि ४

13

श्रीभगवानुवाच पश्यमे पार्थ रूपाणि शतशो
ऽथसहस्रशः नानाविधानि दिव्यानि नानाव
र्णाकृतीनिच ५ शाङ्करभाष्यं १

एवञ्चोदितोऽर्जुनेन भगवानुवाच पश्यैतीति पश्य मे मम
पार्थ रूपाणि शतशोऽथ सहस्रशः अनेकशः इत्यर्थः नानि
च नानाविधानि अनेकप्रकाराणि दिवि भवानि दिव्यान्यप्रा
कृतानि च नानावर्णाकृतीनि च नाना नीलपीतादिप्रकारा
वर्णा विलक्षणास्तथा आकृतयोऽवयवसंस्थानविशेषा येषां
रूपाणां तानि नानावर्णाकृतीनिच ५

आनन्दगिरिकृतटीका २

अर्जुनमतिभक्तं सावधानं प्रार्थितप्रतिश्रवणेनाश्वासयितुमाह एव
मिति ५ स्वामिकृतटीका ३

एवंप्रार्थितःसन् अप्रकटनेरूपंदर्शयिष्यन् सावधानोभवेत्यर्जुनमभि
मुखीकरोति श्रीभगवानुवाच पश्येतिचतुर्भिः रूपैरेकतोयिनानावि
धानारूपाणीतिवक्ष्यमाणैरप्रपंचितानेकप्रकाराणिअलौकिकानि
ममरूपाणिपश्यवर्णाः शुक्लकृष्णादयः आकृतयोवयवसन्निवेश
विशेषाः नानाअनेकावर्णाआकृतयश्चयेषांतानिनानावर्णाकृती
नि ५ वेङ्कटभाष्यटीका ४

एवमर्जुनेनस्वरूपदर्शनंप्रार्थितंतदर्शयितुकामोभगवानुवाच प
श्यमइति शतशःशतानिसहस्रशःसहस्राणिनानावर्णाकृतीनिना
नाविधवर्णसंस्थानि ५ रामानुजभाष्यटीका ५

एवंकौतूहलाक्रान्तेनहर्षगद्गदकण्ठेनपार्थेनप्रार्थितः ॥
श्रीभगवानुवाच पश्यमेसर्वाश्चयभूतानिरूपाणिअथशतशःसह
स्रशश्चनानाविधानिनानाप्रकाराणिदिव्यान्यप्राकृतानिनानावर्णाकृ
तीनिशुक्लकृष्णादिनानावर्णाकृतीनिपश्य ५

अभिनवगुप्तकृतटी ६

स्पष्टार्थं ५ ॥ ॥

१ श्री. अथभगवानपिश्लोकिकरूपंदिदृक्षतेनमर्जुनेनसन्त्वीकरोति पश्ये
गी.टी. त्यादि चतुर्भिः भोपार्थमेशतशः सहस्रशश्चरूपाणिपश्यशतशोमु
ख विभूतिरूपाणिसहस्रशोदीनराणि शतसहस्रशोनेनरसे
ना. त्यादीवा नानाविधानिनाप्रकाराणि तदेवाह नानावर्णाः शुक्ल
दयः नानाश्राकृतयश्राकारायेषांतानि ५

वनमालीटीका ८

स्वभक्तेनैवंप्रार्थितःसन्नाह पश्येति श्लोकचतुष्टयेपि
पश्येमारूपाडुतरूपाणिदर्शयिष्यामितंसावधानोभवेत्यर्जुनमभि
मुखीकरोतिभगवान् शतशोथसहस्रशश्चसंमितानिचनानाविधा
नेकप्रकाराणि दिव्यानिचडुतानि नानाविधवर्णाकृतयो
नादिप्रकारास्तथाकृतयश्रावयवसंस्थानवयोविशेषायेषांतानि
नानावर्णाकृतीनिचमम रूपाणिपश्यार्हसोऽदृष्टमहंभवेत्यर्थः
ना. यथाषोडशसहस्र स्त्रीनांविवाहस्वस्वसदेवादेवैकस्मिन्नेवका
लेतावद्रूपत्वमन्येषांतावद्रूपाज्ञानेअघटघटनापटीयस्याचिन्मश
नो. क्त्योपपन्नेतथात्रापेकस्यवस्तुनेकरूपत्वमुपपद्यतइतिभावः ५

क्रमसंदर्भजयन्तीटीका. ५

इत्येवंभगवतोविश्वरूपदर्शनेहेतुनाभगवत्प्रपन्नेनपरमस्नेहेणा
र्जुनेनसम्प्रार्थितःस्वाभाविकानवधिकातिशयाचिन्त्यानंतगुणशा
लकोभक्तवात्सल्यतयातिप्रपन्नोकल्पवारिजवदननयनोभक्तकै
रवतूर्णोदुराजोभक्तिविवशोभक्तकामपरिपूरकोभगवान्नर्जुनं
प्रत्युवाचचतुर्भिःपश्यमेपार्थेति श्लोकचतुष्टयेषुपुनःपुनःपश्ये
त्यादर्शनीयानेकरूपाणामत्यद्भुतत्वेविविधानेकविधत्वमाकृते
श्चसूचितं दृष्टाश्चमेननयनस्यमोसिद्धस्त्वेयोममानीवप्रियोमत्स
पत्रभासि अतस्त्वास्मरनरादिभिरपिदर्शनायोग्यमलौकिकमिदरू
पंदर्शयामितत्रातिरेकःकोपीदृशंदृष्टेनशक्नोतीतिसूचितम् मेम
वैश्वरूप्यमर्वनियंतृविभूतिमतोममशतशःशतानि अथचसह
स्रशःसहस्राणिनानाविधान्येतत्प्रकारकाणिचपुनर्नानावर्णाकृ
तीनिनानानेकवर्णाःश्वेतकृष्णरक्तपीतादयः आकृतयोवयवसं
निवेशभूताप्राकारायेषांयेषुवातानि नत्वेतादृशाविमाकृतामपि
सुरितिचेन्नादिव्यानिप्रकृतिकार्यतत्संबंधगंधरहितानि निम

स्वाभाविकानीमानीश्वरस्य इमानेनैतेषांमध्येमायाकार्यत्वमपिहूर-
नोनिराकृतमरूपाणिममविश्वविग्रहाकाराणिमदेकदेहस्थै
कदेशस्थितानीमानीश्वरस्यममदेहेगुडाकेशनैवैकस्थेजगत्कृत्स्न
मिनिवसमाणात्मरूपाणिभगवद्विग्रहादृष्टथैकस्थितिप्रह
त्तिकत्वान्मेरूपाणीमुक्तंमद्देकेममस्मिंश्चपश्यप्रमत्तविध-
गाकुरुयोगमैश्वरंत्रलोदमत्कृपयात्वमेतानिदृष्टयोगेभ्
वेनमैश्वरंपार्थसारथेर्विश्वविग्रहस्यभगवतोविग्रहस्यैकत्वे
पिरूपाणीनिवहववनमङ्गप्रत्यङ्गादीनांवैविध्यवैचित्र्यकथ
नाभिप्रायेणोक्तं ५

एवमर्जुनेनभक्तानुग्रहैनप्रार्थि मधुसूदनटीका १०
तःसन् श्रीभगवानुवाचपश्येमानीत्यादिना श्रीभगवानुवाच हे पार्थ
पश्येमानिमेमदीयानिरूपाणिशतशोथसहस्रशश्चमपरिमितानिनानाविधानि
श्रनेकप्रकाराणिदिव्यान्मदुक्तानिरूपाणिनानाविधवर्ण
र्णानीलपीतादिप्रकाराः तथाश्राकृतयश्चमदवयवसंस्थान
येषां नां विशेषात्तानिनावर्णाकृतीनिचममरूपाणिपश्य अहंलोकद्र
ष्टमर्हीभवपार्थ

सदानंदटीका ११

एवमर्जुनेनभक्तेनप्रार्थितोहरिरब्रवीत् श्रीभगवान् इमानिरूपाणि
दर्शयिष्यामिसर्वेशः २ सावधानोभवेत्येवमाभिमुख्यायत
स्तव पश्येत्यस्यैवानुवादोनिरूपणंश्लोकचतुष्टये २ श्रनेनानिस्वरू
पाणिदिव्यान्मदुक्तानिमे तथानेकप्रकाराणिदृष्टमर्हो
भवार्जुन ३ वर्णानानाविधायेषांनीलपीताकृतादयः न
श्रावयवसंस्थानभेदोयेषामनेकधा ४ तानिमेपश्यरूपाणि
सावधानेनचेतसा ५ ५

नीलकंठटीका १२

एवंप्रार्थितःसन्भगवानुवाच पश्येति शतशइत्यादिना
श्रनेनानीमुक्तं नानावर्णानिनानाकृतीनिच ॥५॥

हेपार्थमेकमेवपरमार्थसतःपरमात्मनःश्वेश्वर्यादिशयात्मशक्तिभेदेनसंबद्धानिश्रुतेः
आनानिरूपाण्याकृतिविशेषात्मकानिपश्यावलोकय कीदृशानिनानाविधानिविचि
त्राणि अतएवनानावर्णाकृतीनिविविधावभाससंस्थानानित्यादिवाक्यमानुषीयाणीति ५

ज्ञानेश्वरीका

स्थूल पनतत्सामान्यनउद्दिश्यविशेषणा ह्रा ५

रामकेवलीका

लक्षिकी

हेपार्थशतशःसहस्रशश्चतिअसंख्यातानि नानाविधान्यनेकप्र
काराणि दिव्यानिरंतनयावभासमानत्वेपिस्थूलादीनामिवग्रा
लोकेतराणि नानाविलक्षणावर्णाःशुक्लादयआकृतयोवयवसं
स्थानविशेषायेषांतानिरूपाणिपश्य द्रष्टुमर्हीभव अरैलोक्

५॥

पंचोलीटीका

एवंप्रार्थितोभगवान्अत्यद्भुतंस्वकीयंरूपंदर्शयिष्यन् साव
धानत्वंसंपादनेनार्जुनमभिमुखीकरोतिपश्यमेइतिहपार्थ
मेममशतशः अथसहस्रशः नानाविधान्यनेकप्रकाराणि
दिविभवानिदिव्यानि अप्राकृतानिचपुनःनानावर्णाकृतीनि
नानाविधानिलक्षणानिनीलपीतप्रकारावर्णास्तथाआकृतय
अवयवस्थानविशेषायेषांरूपाणांतानिनानावर्णाकृतीनि
पश्य ५

स्पष्टार्थोयंश्लोकः रणवीरसमिहोथिनी॥
५॥

५॥ मधुभाष्य

भाषा अनुवाद

अब ऐसी प्रार्थना अर्जुनने किया तब भगवान श्रीकृष्ण अपने रूप देखावने का मनोरथ करके अर्जुन को सावधान होउ यह कहिके चारि श्लोक से कहते हैं कि हे पार्थ अर्जुन अपरिमित नाना प्रकार के अलौकिक मेरे रूप देखो और वर्ण कहे शुक्ल कृष्ण आदि आकृति कहे कर चरण अङ्ग सब यथा योग मेरा दिव्य रूप नाना वर्ण नाना आकृति तुम देखो जो देखा चाहते हो ५

दोहा

मोरे पार्थ रूप कहं पुनि सहस नंदेष बहु विधनके दिव्य बहु वर्ण अकार विशेष ५

16

पश्यादित्यान् वसूंश्चाश्विनौमरुतस्तथा
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणिभारत ६

शाङ्करभाष्यटीका. ६

पश्यादित्यानिति पश्य आदित्यान् द्वादश वसूनष्टौ रुद्रानेकाद
शाश्विनौ द्वौ मरुतः सप्त सप्तगणान् एतान् तथा च बहून्य
न्यपि अदृष्टपूर्वाणि मनुष्यलोके त्वया त्वत्तोऽन्येन वा केन
चित् पश्याश्चर्याणि रूपाण्येतानि भारत ६

आनन्दगिरिकृतटीका. २

दिव्यानि रूपाणि पश्येत्यनेन नेशानोऽनुक्रामति पश्यादि
त्यानिति तान् मरुतस्तथा पश्येति सम्बन्धः नानाविधानीत्यनेन
नदेव स्फुटयति बहूनीति अदृष्टपूर्वाणि पूर्वमदृष्टानि नाना
वर्णाकृतीनीत्यनेन वनक्ति आश्चर्याणीति ६

स्वामिकृतटीका. ३

नान्येवाहपश्येति आदित्यादीन्ममदेहेपश्य मरुतएकोनपंचाश
देवविशेषाः अदृष्टपूर्वाणिनत्वयाऽन्येनचपूर्वमदृष्टानिरूपाणिआ
श्चर्याण्येतानि ६

नीलकण्ठभाष्यटीका. ४

सप्तार्थे ॥

रामानुजभाष्यटीका. ५

पश्येति ममैकैकस्मिन्रूपेपश्यादित्यान्द्वादशवसूनष्टौरुद्रान्
एकादशाश्विनौद्वौमरुतश्चैकोनपं[illegible]चाशत प्रदेशार्थमिदंरह
स्यंनिमित्तानिशास्त्रदृष्टानिचयानिवस्तूनिचतानिसर्वाण
यामपिसर्वेषुकालेषुसर्वेषुचदेशेष्वदृष्टपूर्वाणिबहून्याश्चर्याणि
पश्य ६

श्रीमद्वंशीधरकृतटीका. ६

॥ ॥ ॥

सप्तार्थे ॥६

परमार्थप्रदीपटीका. ७

अथनान्येवाह पश्येति द्वादशादित्यान् अष्टवसून् द्वावश्विनौ प

१

कोनपंचाशन्मरुतः तथा अन्यानि अदृष्टपूर्वाणि अपूर्वमदृष्टान्यत
एवा अपूर्वजनकानि अरूपाणीति अपूर्वं अकल्पितं हि मनः पृथग्जनेति
इतीति

वनमाली टीका ८

दिव्यानि हृद्यानि पश्येत्यत्रैकानामेवान्वयमनि पश्येति पश्यादिमा
नदादशवसूनष्टौरुद्रानेकादशाश्विनौद्वौ मरुतः एकोनपंचाशत्
तथान्यानपि दिव्यानि सर्वाः वह्व्यस्मात्पदृष्टपूर्वाणि अपूर्वमदृष्टानि
मनुष्यलोकेऽस्मन्नयनाभ्यामनेनाकर्णयित्वा नदृष्टानीत्यर्थः पश्यास्य
र्याण्यद्भुतानि आश्चर्यमया निमदृष्टिनन्नस्थितानिद्रादिलोकस्था पा।
लोकाश्चपश्येतिभावः ८

अर्जुनवैनयन्तीटीका ८

स्वदेहस्थानिनानावरूपाण्याहद्वाभ्याम् पश्यादित्यादिभि
नदितेःपुत्रान्द्वादशसूर्यान्निरस्तमुखत्वादादित्यादिकपालाद्यवस्
नष्टौरुद्रानेकादशाश्विनौद्वौ नासत्यौमरुतःएकोनपंचाशद्वा
न ममैकस्मिन्नेवदेहेरत्नत्रयेणसम्बंधः नेपश्यसावधानतयाव
लोकयतथा तथाहिभारत अदृष्टपूर्वाणि नयनेनापिकेचिन्न
वैमितःप्राक्कालेनदृष्टानिनन्वस्मिन्विराटमावतोरथगादिभिर्नेत्रेतन्ना
नायशोदयासभायांद्यूतादिभिश्चदृष्टानिकथमदृष्टपूर्वाणिस
किलवक्ष्यते इतिचेत्सत्यंतेनोभयोत्पादनायमोहनायचकिंचित्का
रकंपरिच्छेत्तेनरूपमयातेनेदमिनाद्दानीन्तनास्मन्नेतत्प्रकारका
णपपत्तिश्चात्रनयादृष्टानिसत्तानितेस्तदितरैरन्यैरेत्यादिभिः
सत्तैःकैश्चिदपिदृष्टपूर्वाणिनभवंतीनोमङ्किसगच्छतेयवना
संभवेनिवोत्तम अदृष्टपूर्वंतमवद्दृश्यति वह्व्यननास्मन्नयनाभ्यां
णपद्भुतानितैरन्यैर्वा आश्चर्याणिकानिचिद्दृष्टान्यपिवह्व्यास्मन्नयनाभ्यां
तनदृष्टानिएवेभूतानिरूपाणिमत्वसादेनमदन्यद्गृहभाजनस्थमेव
पश्यमदृपदर्शनादीभवेत्यर्थः ८

दिव्यानिहृद्यानिपश्येत्यत्रैकानामेवान्वयमनि पश्येति मधुसूदनीटीका ८
नदादशवसूनष्टौरुद्रानेकादशाश्विनौद्वौ मरुतः स

मस्मन्नकानेकोनपंचाशत् तथामानपिदेवानिमर्षः बहून्यमा
नि अदृष्टपूर्वाणिपूर्वमदृष्टानिमनुष्यलोकेवयानेनवाके
नचित् पश्याश्चर्याण्यद्भुतानि हेभारत अत्रशतशोथसहस्रशः
नानाविधानीत्यस्यविवरणंवक्ष्यतीति आदित्यानित्यादिव अदृष्ट
पूर्वाणीतिदिव्यानीत्यस्य आश्चर्याणीतिनानावर्णाकृतीनीत्यस्य
निदृष्टये

॥

सदानंदीटीका. ११

पश्येमन्कोशतोहाभ्योनामनुक्रामतीश्वरः पश्यमेहादशादित्या
वसूनष्टासिनावुभौ रुद्रानेकादशैकोनपंचाशन्मरुतस्तथा
तथामानपिदेवाल्लदृष्टपूर्वाभवार्जुन २ बहूनिमागदृष्टानिव
यावान्येनकेनचित् अत्यद्भुतैकरूपाणिपश्यभारतभूषण ६

नीलकंठीकादी. ११

दित्यानिनावदाद पश्यादित्यानिति अदृष्टपूर्वाणिआश्चर्याणि
अद्भुतानिचत्रमेवपंचमुखषण्मुखादीनि ६

आनंदीटीका

पाऊसभायांदृष्टपूर्वानादित्यादीन्पश्यपवमदृष्टपूर्वाणपन्मर्म्भ
र्यागिपश्य ६॥

रामकंठीरीका सदार्थः ६

त्रासिकी रत्नगिरीका एवंसामान्यनउक्ताविशेषतोनिर्दिशति॥

आदित्यादिग्रहणमुपलक्षणार्थम् येदृर्वविभूतियोगेआदित्यादयो
व्याप्तेनोक्ताः तानिदानींपश्यमहाबाहोमामकानतऊरु तथायान्यपि
बहून्यपरिमितानिअदृष्टपूर्वाणित्वयानेनवाकेनचित्पूर्वमदृष्टान्या
श्चर्याणपश्चद्भुतानिचपश्य ६॥

[1] सामान्येनोपक्रम्यविशिष्याएवंदृष्टमाह आदित्यानूद्वादशसंख्यान्देवविशेषांस्तथावसूनष्टसंख्यान्
रुद्रानेकादशसंख्यानश्विनौमरुतश्चैकोनपंचाशतंदेवविशेषान्पश्येतिप्राधान्याद्देवताग्रहणाएवंदृष्टमात्रे
णसंक्षेपतआह एतानितावत्त्वयाहरलोकवासिनासताद्दष्टानियान्यपिबहून्यपरिमेयान्यदृष्टपूर्वाणि
नकदाचिदालोकितानि आश्चर्याणितान्यपिसर्वाणिपश्य ६॥

पंचोलीटीका

किंचपश्येति हेभारतत्वयाआदित्यान्वसून्रुद्रान्त्रश्विनौमरुत
पश्यबहून्यदृष्टपूर्वाणिआश्चर्याणिआश्चर्यकराणिपश्य ६

रणवीरसमिद्धोधिनी॥

अथनानाविधानिदिव्यानि रूपाणिदर्शयति पश्येति भारत
पश्यादित्यानादित्यगणान्सूर्यलोकव्यापिनस्तथारुद्रान्रु
गणानेतन्नित्तचरान्सोमलोकव्यापिनस्तथाचवसून्चसगण
न्सूलोकव्यापिनोग्न्युत्पादकान्पश्येत्येननानुषंगः अश्विनौसू
र्यचंद्रप्रतिरूपकावश्विनीसुतौ तथामरुतो मरुद्गणान्चातर
पानान्देवसंज्ञकांश्च पश्य किंच बहूनीति बहून्यपदृष्टपूर्वा
णिपूर्वंतनरैरनियान्यपूर्वाद्भुतदर्शनान्यलौकिकचमत्का
रकानिमद्रूपाणितान्यपिसाक्षात्कुरुविलोकयेत्यर्थः ६॥

मधुभाष

६॥

भाषा अनुवाद

अब सोई आप कहते हैं कि हे भारत सब आदित्य औ वसुगणक
रुगण तथा अश्विनीकुमार औमरुतगण ये सकल देवता को
मेरी देह मे देखो और हे अर्जुन जो मेरा रूप न तुम ने न और
किसीने कभी देखा है ऐसा अद्भुत मेरा रूप देखो ६

दोहा

देखहु वि वसु रुद्र कहुं अस्विनि मरुमारुत सर्व अदृष्ट बहु देख
हुं आचरज मय भारत ६॥

इहैकस्थंजगत्कृत्स्नंपश्याद्यसचराचरं ।
मम देहे गुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ७

शाङ्करभाष्यटीका १

नकेवलमेतावदेव इहैकस्थमिति इहैकस्मिन् शि
ते जगत् कृत्स्नं समस्तं पश्याद्येदानीमचराचरं सह चरेणाचरेण
वर्तते मम देहे गुडाकेश यच्चान्यत्पराजयादि यच्छक्यं मे य
दा जयेम यदि वा नोजयेयुरिति यदवोचः तदपि द्रष्टुं यदीच्छ
सि ७

आनन्दगिरिकृतटीका २

न केवलमादिमवस्थायां व मद्रूपं त्वया द्रष्टुं शक्यं किन्तु समस्तं
जगदपि मदेकस्थं द्रष्टुमर्हसीत्याह नेत्यादिना समग्रमीदृशं मिथः
सम्बध्यते समासान्नगतापि समग्री तत्रै वानीना यदीच्छसि तर्हि
इहैव पश्येति सम्बन्धः ७

स्वामिकृतटीका ३

किंचेदेति नत्वनत्वपरिश्रमतावर्षकोटिभिरपिद्रष्टुमशक्यं कृत्स्नमपि
चराचरसहितंजगदिहास्मिन्मम देहैवयवरूपेणैकत्रैवस्थितंत्वंअ
नैवपश्ययच्चान्यत् जगदाश्रयभूतंकारणस्वरूपंजगतश्चावस्थाविशे
षादिकंजयपराजयादिकंच यदपित्वंद्रष्टुमिच्छसितत्सर्वंपश्य ७

वैष्णवभाष्यटीका ४

इहममदेहेगुडाकानिद्रातस्याईश्वरःस्वामीगुडाकेशःजितनिद्रस्त्व
ंः ७॥

रामानुजभाष्यटीका ५

इहेति इहमैकस्मिन् देहेनाण्डैकदेशस्थंसचराचरं कृत्स्नंजगत्प
श्य यच्चान्यद्द्रष्टुमिच्छसि तदप्येकदेशस्थंपश्य ७

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ६

परमार्थप्रकाशटीका ७ यासोनास्तीत्याह इहैकस्थमिति ॥

तान्यत्रे ष्टदेशनःकालनेवात्र
इहैवैतिनिनिवोजेमासर्वेभूतानांतथात्मस्थविश्वस्यपरिदानेमि
नित्यकालाकलवीभूतेमनष्याकृतिकेममदेहकृत्स्ने सर्वंजगदेक
स्थमेकत्रस्थितमग्राध्यैवपश्येनउक्तं पार्थोरथस्थइभुजस्वरूपेद

दर्शयदेहेविलंबेश्वरूपं नविश्वरूपेरदर्शयस्वयहिश्वरूपस्यनिधा
नमेनदितियतः पूर्वंस्वशरीरांतर्मार्कंडेयमुनयेप्रलंबतरंशरीरेक
देशेननमेविश्वरूपंदर्शितवान् तडुक्तमारण्यकेपर्वणिकाम्यकव
नोपविष्टंश्रीकृष्णं महिनेदृष्टिरप्रतिमार्कंडेयेन ननःकदाचिन्मपण
मितस्मिन्छिलसमये न्यग्रोधस्यमहांतंवेनछायानगधिप उप
विष्टनपर्यंकेपूर्णेदुसदृशानने फुल्लपद्मविशालतंवातंश्रीवत्सला
छने ततोवोलनतेनसंसदसाविहतमुत्र तस्माद्दमवशावकेदेवयो
गात्मवेशितः तत्रप्रविष्टस्तकुक्षावपश्यन्निखिलंजगत् यःसदेवो
मयादृष्टः प्रलयेनिभेत्तपः सएवपुरुषाग्रेसंवभीतेजनार्दनः
ग्रसेववत्रेननस्तिनेप्रजहातिमा दीर्घमायुषकौंतेयस्वच्छद
मरणंचवै सएषकल्पोवार्स्योयःपुराणपुरुषोत्तमः ग्रासेहरिरविश्रा
म्याक्रीडनिवमदाभुजः तथाग्रास्यमेधिकेपर्वणिपोऽवदाभिषेका
नंतरेहारिकामिगोऽनेकमुनेरूपदेशाद्यभगवतोविश्वरूपंदर्शिते
नहिस्मरभयाकिंचिन्निस्मरेत उतेकः ग्रभिज्ञानामिजगतः कर्तारं
लोजनार्दनयदिनस्मरेकिंचिन्नोहेहिजनार्दन इष्टमिच्छामितेरूपं
वैस्मृतंदृश्यं वैशंपायनाः ननस्मृतंसर्वंतात्मादर्शयामासतद्व
पुः शाश्वतंविश्वरूपंहिदृश्यंसर्वात्मनहरि भागवतेपि सानत्रद
टंविश्वंजगत्स्थावरंवेदिशः सर्वाहिद्दीपादिभूगोलंसवाद्यौं
डनारकमिति एवंसप्तकिंपुनःसकलंदृश्यंयः ग्रथकिंपुनर्भूत
जातमिहसा यंवेत्ति यद्वाग्नतकारणीभूतब्रह्मादिदेवता विशेषा
दिकंवादृष्टमिच्छसितदपिपश्येत्सर्वः ग्रथशतशीर्षसहस्रशीर्षस्य
श्रुतिरपि सहस्रशीर्षापुरुषःसहस्रात्तः सहस्रपात् भूमिंविश्वतो
ह्यमानतिष्ठद्दशांगुलमिति भाष्य सहस्रशीर्षेतिवोऽशर्चेसूक्ते
नारायणोनामऋषिः ग्रेनाभिष्टुप् शेषाग्रनुष्टुभः ग्रथक्रमहद्वा
दिचेतनोयः पुरुषःसदेवतेतिसर्वानुक्रमः तत्रप्रथमासहस्रशीर्षे
ति सर्वप्राणिनामसंख्येयानांब्रह्मादेहाविराड्ब्रह्मायः पुरुषःसोयम
हस्रशीर्षा सहस्राक्षस्सहस्रपादित्यनेनः शीर्षेगिरोभिः पुरुषस्य
यैःयानिसर्वप्राणिनांशिरांसिनानिसंख्यानितद्देहानः पानित्वात्तदी
यानेवेतिसहस्रशीर्षेत्ते एवंसहस्राक्षत्वंसहस्रपादत्वंच सपुरुषः

भूमिव्याप्तोऽगोलरूपोविश्वतः सर्वतोकृतापरिवेष्टादशां
गुलपरिमितदेशंत्रसनिष्टन् अतिक्रम्यावस्थितः दशांगुलमि
त्यर्थः तेनत्रयोऽगुष्ठहृदिपिसर्वतोव्याप्यावस्थितमित्यर्थः
यद्वासप्तव्याहृतिकैप्राणायामैदशप्राणावायवदशांगुलानीति
केचित् ७

वनमालीटीका. ८

नकेवलमेतावदेवसमस्तंजगद्पिमद्देहस्थंद्रष्टुमर्हसीत्याह
इहास्मिन्ममदेहेएकस्थेएकस्मिन्नेवावयवरूपेणस्थितंजगत्
वेस्थितंकृत्स्नंसमस्तंजगच्चराचरंनेगमस्थावरसहितंतत्रत्य-
त्रपरिभ्रमतावर्षकोटिसहस्रैरपिद्रष्टुनशक्यंअथाधुनैव
पश्यदेशुक्लाकेशा आलस्यभूमयद्यान्मज्जयशरीरादिकंद्रष्टु
मिच्छसिनदपिमंदेहेत्यादयश्लोकाः ७

कृष्णवैजयन्तीटीका. ९

किंवा देशुक्लाकेशाजिनविद्यममवैश्वरूपंद्रष्टुमर्हसीत्येकस्मिन्मे
वंदेहशरीरे एकस्थेनत्रापिएकदेशेस्थितेनसचराचरेणगवरस
हितेनकृत्स्नेनसमस्तेनजगद्वेतन्नाम्नेकं अथाधुनैवंपश्यत्रत्र
त्रकर्मणावशेनपरिभ्रमतान्नानावैगणसाधनवत्तापितयापु
नर्वर्षैरपिद्रष्टुमशक्यंतदेवैकवैश्वरूपंदत्त्वयाऽहमेवाव
लोकयेत्यर्थः चपुनःयत्कालस्वभावप्रकृतिमहदहंकारादिकं
जगत्कारणरूपंब्रह्मेशमरीचीत्यादिप्रजापतिरूपंचतदंशलो
कात्मकमण्डंचत्रसदप्राकृतंयद्दृश्यतदपियत्तद्रष्टुमिच्छसित
त्तत्सर्वंत्वंपश्यदमित्यभिधीयतावच्छेदेनधारयितुमशक्यम
पिमत्कृपयैवमवलोकयेत्यर्थः ७

मधुसूदनीटीका. १० जगदपिमद्देहस्थंद्रष्टुमर्हसी
नकेवलमेतावदेवसमस्तं त्याह—इहास्मिन्ममदेहेएकस्थेमेकस्मिन्नेवावयवरूपेणस्थितंजगत्
कृत्स्नंसमस्तंसचराचरंनेगमस्थावरसहितंतत्रत्यपरिभ्रम-
तावर्षकोटिसहस्रेणापिद्रष्टुमशक्यं अथाधुनैवपश्यदेशुक्ल
केशा यद्वामज्जयशरीरादि यत्रैकमेवहाजयेमयादि
वानोजयेत्रपरिति यदवोचस्तदपिद्रष्टुंयदीच्छसि तदपिमंदेहे

छेदाद्यपश्य

[illegible]

[illegible]

[illegible]

स्थितंकृत्स्नमविलंचराचररूपवात्मंतदेणाद्विप्रकारं यद्यप्यत्म
किंविद्यामिलषितंद्रष्टुमभिवांछसितत्रैकस्यमेवपश्येतेक
मेवपरमार्थसतः परमकारणस्वस्वमायाशक्त्यवभासितानेना
नात्मोत्मभिन्नभावात्मकत्वमिदमत्यद्भुतंपश्येत्यत्रतात्पर्यं
॥ १ ॥

लालिकी चतुर्थटीका

किंच हेगुडाकेश इहानुभावयिष्यामीममेस्वरूपंदेहेस्वरूपेंचराचरंस्थावर
जंगमादिचेतनभेदभिन्नंकृत्स्नंवर्षकोटिभिरपिद्रष्टुमशक्यंजगदिदंना
स्यदीभूतंजडजातम् अद्यमत्प्रसादेनैकस्यमेकत्वेनमय्यभेदेनस्थितं
विश्रांतंपश्यपकेत्यत्रभावोविवक्षितः हेकेयार्जुनवचनेकवचनेऽति
वत् यच्चान्यज्जगतोवस्याविशेषादिकंजयपराजयादिकंचद्रष्टुमिच्छसि
तदपिसर्वंमदेहेछेदयपश्य ॥ २ ॥

पंचोलीटीका

नकेवलमेतावदेवचकिंच इहेति हेगुडाकेशइहममदेहेअ
द्याधुनैवकृत्स्नमग्रंचराचरंचरेणाचरेणसहवर्तमानः इति।
सचराचरंस्थावरजंगमंपकस्यंजगत्पश्ययच्चान्यदपिजयपरा
जयादिकंद्रष्टुंज्ञातमिच्छसितदपिपश्य ॥

रणवीरसमिद्धोयिनी

नकेवलमेतावदेवमत्स्वरूपमपितित्याह इहैकस्यमिति अत्र
गुडाकेशेतिसंबोधनं क्षेत्रज्ञविवेकिवयोजनार्थं इहास्मिन्मम
देहे भौतिकेरूपावतारेयत्तस्मिन्नेवकालेसचराचरंकृत्स्नंसर्व
जगद्रूपंजानंयत्तदेकस्थमेकत्रस्थितंपश्यममदेहेनःस्थितंप
श्येत्यर्थः किंच यद्यदि अन्यच्चरूपांतरं द्रष्टुमिच्छसि तदपिप
श्येतिवाक्यशेषः ॥ ३ ॥

मधुभाष्य

भाषा अनुवाद

और इस ब्रह्माण्ड के बीच हर एक स्थानोमे भ्रमण करते हुये जो सूर्य चन्द ग्रह नक्षत्रादि समस्त चराचर जिन को कोटि वर्ष मे भी कोई नहीं देखि सके है सो सब स्थावर जङ्गम समेत सम्पूर्ण जगत इस मेरी शरीर मे अवयव कहे अङ्ग रूप देखो और हे गुडाकेश अर्जुन जगत का आश्रय औ संसार की अवस्था तथा जय पराजय आदिजो कुछ और देखा चाहो सो सब मेरे रूप मे देखो ७

दोहा

इहां एकता सभजगत देख चराचर याद पार्थ अब समदे हम
हिं जो औरहि देखनचाह ७॥

23

नतमो शक्नसे द्रष्टमनेनैव स्वचक्षुषा। दि
व्यंददामितेचक्षुःपश्यमेयोगमैश्वरं ८॥

शाङ्करभाष्यटीका १

किञ्च नतु मामिति। नतु मो शक्नसे न स्वकीयेन चक्षुषा
मां विश्वरूपधरं शक्नसे द्रष्टमनेन प्राकृतेन स्वचक्षुषा स्व
कीयेन चक्षुषा येन न शक्नसे द्रष्टं दिव्येन नेत्रेण ददामि ते
तुभ्यं चक्षुस्तेनपश्य मे मम योगमैश्वरं ईश्वरस्य ममेश्वरं यो
गं योगशक्तिनिशयमित्यर्थः ८

आनन्दगिरिकृतटीका २

मत्पुत्रे यदीमत्कर्मजुषदति किमिति सप्रपञ्चमनवस्थिते मो
स्वचक्षुषा न शक्नोषि द्रष्टुमित्याह न मिति कथं नर्हि तो द्रष्टुं
शक्नुयामित्याशंक्याह येनेति दिव्यस्य चक्षुषोवदप्रमाणयोगश्व
र्यनिशयदर्शने विनियोगं दर्शयति तेनेति ८

स्वामिकृतटीका ३

यदुक्तमर्जुनेनमत्पुत्रेयदिमत्कर्मजुषदति तन्नशक्नोमि नतिते अनेनैवत
स्वीयेनचर्मचक्षुषामांद्रष्टुं नशक्नसे शक्तोनभविष्यसि अतोद्दि
व्यमलौकिकंज्ञानात्मकंचक्षुस्तेभ्यंददामि ममेश्वरमसाधारणंयो
गंयुक्तिमद्रचितचटनासामर्थ्यंपश्य ८

वेङ्कटनाथभाष्यटीका ४

स्पष्टार्थं

रामानुजभाष्यटीका ५

नतुमामिति अहंममदेहैकदेशेसर्वजगदाश्रयेशिष्यामित्वत्तनेन
नियमेनपरिमितग्राहिणाप्राकृतेनस्वचक्षुषामांतथाभूतमकस्म
तरविसजातीयमपरिमेयंद्रष्टुनशक्नसेतदिव्यमप्राकृतेममद
र्शनसाधनेचक्षुर्ददामिपश्यमेयोगमैश्वरंममासाधारणंयोगंपश्य
ममानेनज्ञानादियोगमनेनविभूतियोगंचपश्येत्यर्थः ८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ८ ॥ ॥ ॥ १

अथैतादृगभूतरूपदर्शनेनधर्मचलनंशंकमानंप्रत्याह नत्विति मूले
नवर्तमानेनस्वचक्षुषामेषेश्वरमलौकिकंरूपंद्रष्टुंनशक्यसेनहि
नभ्यमहमनयामीदिव्यंददामितेचक्षुःपश्यमेयोगमैश्वरं इत्यादिना
केवलंदेहिमेतनःपश्यमेयोगमैश्वरंइत्यादिनाचक्षुरादिसंस्कारेणतीन्द्रियमपिनिधानं
दर्शनेनतथेवेत्यर्थः देहीत्यादिनाचक्षुरादिदिव्यदृष्टिरितिपूर्वमेवोक्तं हि
प्राणिकायपि देवकीतनयसेवकोक्तंधैर्यमनागपिमनोविनोद
नः अंजनंभवतिदृष्टिदोषनिवर्तकं दृशोर्गतिनिधानसाधनमितितत्
उक्तं यावत्त्वंविश्वरूपंनिजवपुषिपरेद्रष्टवानस्मसाक्षीनावत्त-
स्यात्मभावस्थितइहभगवान् दिव्यदृष्टिस्ततोभूत् नार्थप्रपंचस्य
रूपेरथानमपरंचाञ्जनस्यहि ..... स्यमितिए
..... उक्तस्थिरः
वमेवास्यैरपिदिव्यदृष्टिदानपूर्वकंकृत्स्नदेहावयवेषुविश्वरूपंद्रष्टु
मुपक्रमेयोगपर्वणिपांडवैरात्मनकौरवसभांप्रतिभगवतानेत्रो
क्तं विदुरेणावमुक्तेतकेशवःपरवीरहाउर्योधनंधार्तराष्ट्रमप्यभा
षतदीयावान्एकोहमितियन्मोहात्मसमंमानयोधनं परिभूय
वडवुद्देहदरीतंमोविकीर्षसि इदंवपांडवाःसर्वेनथेवंवाथकृष्ण
यः इत्यादिनाश्रीकृष्णनथेवचमहर्षयः एवमुक्तानहासोद्यैःकेश
वःपरवीरहा तस्यात्मयतःशौरेर्विश्वरूपाण्यदर्शयन् अंगुष्ठमा
त्राण्यिदमाप्लुवुःपावकार्चिषः तस्यब्रह्मललाटस्थोरुद्रोवक्षसि
नाभवत् प्राउरालनेत्रादोर्भ्यांसकर्षणधनंजयो भीमोवृष्टिरथेव
मंदीपुत्रोवृष्टद्युम्नः अथकाहसयंश्चैवप्रयुक्तप्रयुवोरथा आवि
वेभूवुःकृष्णगात्रेषुसर्वतमहाप्रभाः शंखचक्रगदाशक्तीःशा
र्ङ्गलांगूलनंदकौ अष्टपन्नगतान्येवसर्वप्रहरणानिच नानावा
रुपकृत्स्नमक्षीणमानानिसर्वशः नेत्राभ्यांवक्त्रतश्चैवश्रोत्राभ्यांच
समंततः प्राउरासन्महारौद्रैःसंभृताःपावकार्चिषः रोमकूपेषुचत
स्यार्यस्यैवमरेचयः तदृष्ट्वा महदाश्चर्यंकेशवस्यमहात्मनः नमी
लयतनेत्राणिराजानस्तस्यचैतमः तेनभीष्मंचद्रोणंचविदुरंसंज
यंतथा प्राद्रानेषांसभगवान् दिव्यंचक्षुर्जनार्दनः तदृष्ट्वा महदा

अथप्रकृतमनुसरामः ८

वनमाली टीका ८

इंद्रियप्रवर्तकस्यमनसाप्यगम्यस्यममापरोक्षमत्कृपाविना
नभवतिमत्कृपयाचाताधासेनभवतीत्याह नत्विति अनेनै
वप्राकृतेनमत्सादृश्येनचचक्षुषामादित्यालोकिकानेनेश्व
र्यविशिष्टंद्रष्टुनशक्यसेनशक्नोषि अतोदिव्यमप्राकृतेमम
दिव्यरूपदर्शनंतवेदामितेनभ्यंचक्षुस्तेनचक्षुषापश्यमेयो
गमन्नटचटनासामर्थ्यातिशयमैश्वरंममासाधारणं
यद्यपियावद्यंविशिष्टेभगवद्रूपेस्वयोपासंयज्ञानादुक्त
स्तावद्यंविशिष्टरूपमर्जुनःसर्वदासाक्षात्करोतिनचाप्यमि
तगुणालयस्यहरेस्तोथिकमैश्वर्यमर्जुनेनभगवन्मुखाद्
श्रुतंतदेवायंद्रष्टुंतत्साक्षाद्रष्टुं तस्मादनेनचक्षुषाद्रष्टुमशक्यं
नाटशैश्वर्यदर्शनयोग्यंभगवत्प्रसादस्याभावात् यथायथा
हिभगवत्प्रसादाधिक्येनयाताटगधिकैश्वर्यस्यज्ञाने नायमा
त्मप्रवचनेनलभ्योनमेधयानवक्रुताश्रुतेनयमेवैषएतेन
तलभ्यइतिश्रुतिरितिभावः ८

श्रुतप्रकाशिकाटीका ९

मत्प्रसेयदिनछुद्धामिमर्जुनमाधित्तेसेपादित्तेस्वस्यप्राकृत
रूपदर्शनयोग्यंदिव्यंचक्षुस्तेस्तयमेवददावित्याह नत्वमा
मिति अनेनैवप्राकृतरूप ग्राहिणाप्राकृतेनस्वचक्षुषास्व
कीयेनचर्मचक्षुषामामेवंविधंयुगपदुदयगतानेतत्तेजश्च
क्षुषाप्रकाशकंसकलेतरविलक्षणंमत्प्रकृतरूपंद्रष्टुनशक्य
मेनशक्नोषिसमर्थोनभविष्यसीत्यर्थः अतस्तेतुभ्यंदिव्यमप्रा
कृतंमद्दर्शनसाधनभूतंचक्षुर्ददामियथाहंनिरतिशयप्रभा
क्रांतमात्मानंस्वनस्मिंश्चेवंचक्षुस्तरमपितद्दर्शनंतेददामी
त्यर्थः मेममसर्वेश्वरस्येश्वरयोगमसाधारणंमनज्ञानादि

योगमनेनविभूतियोगंचपश्यमेयोगेश्वरकृष्णेनेनेतिश्रुतेर्योगेश्व
रेपरमंरूपमैश्वरमितिवक्ष्यमाणात् मदीयमेवदिव्यंनचक्षुषाम
मैश्वरंरूपंपश्येत्यर्थः ननुयद्यनेनस्वभगवत्तादिव्यंचक्षुर्ददौत
थामनोपिदिव्यमदादितिचेन्नतस्यतद्रूपेकृत्स्नदर्शनादसथा
नदेवमेदृशंयद्देवरूपं किरीटिनंगदिनंचक्रहस्तमिच्छामित्वां
द्रष्टमहंतथैवतद्रूपेणचतुर्भुजेनसहस्रबाहोभवविश्वमूर्तेत
स्यैवपार्थप्रतेःनचपार्थसारथिरूपात्सहस्रशिरसोविश्वरूप
स्याधिकंभवेदित्यटद्दिप्रदानरूपलिङ्गादितिवाच्यंनस्यैवदे
वाकारस्यहिभुजेचतुर्भुजादिनराकारधीनत्वात्निरतिशय
तेजःप्रभावेवामेक्रोतेसहस्रशीर्षादिरूपेनिरतिशयतेजःप्रभा
वेनामेक्रोतेचदृष्टिर्नोहिणीयुक्तानत्वतिशयौदार्यलावण्यमाधु
र्यादिगुणगणोवनराकृतिकृत्स्नरूपानुभावविनीटद्दिस्तत्राहि
र्मोविचित्रविश्वरूपस्यसर्वपरत्वेनैवंवयंदेवस्यनोःपार्थसार
मलब्धयेवविधेयइत्याह प्रसीदेतिसार्द्धं २५

वनमाली टीका ८

दंष्ट्राभिःकरालानिविकृतवेनभयंकराणिप्रलयकालानलसदृ
शानिचतेमुखानिदृष्ट्वैवनतानिप्राप्यभयवशेनदिशः पूर्वाप
रादिविवेकेननजाने अतोनलभेशर्मसुखंत्वद्रूपदर्शनेप्यतोहे
देवेशहेजगन्निवासप्रसीदप्रसन्नोभवमांप्रति यथायथाभयाभा
वेनत्वद्दर्शनंलभेतथाभिनिशेषः २५

क्रमसंदर्भयत्नटीका. ५

किंचदंष्ट्राकरालानीतिदंष्ट्राभिः अतितीक्ष्णदीर्घैस्त्वक्विरलपंक्ति
भिःकरालानिविकृतवेनभयंकराणिचपुनःकालानलसन्निभा
निमहाप्रलयाग्निसदृशानिमुखानितववदनानिदृष्ट्वैवपूर्वकारेण
नतानिसृष्टा प्राप्तताभयभीतोःस्मिकिंतुमुखानोदर्शनमात्रेण
वेतिसूचितं दिशःपूर्वापरादिदिग्विभागानविवेकेनाहंनजानेन
वेद्मि अतोहेतोःशर्मचसुखंनलभेयशब्दपूर्वेनवपूर्णेन्दुनिभमनिंद्य
रसमकंदकांतिलक्षणितस्मरदनेवदनेदृष्ट्वाःहेसुखंप्राप्नुवंत
णापुनानप्राप्स्यामितस्माद्देजगन्निवासजगदाश्रयहेदेवेशदेवानांके
शवेशसेव्यशंखादीनामीशनियंतः प्रसीदप्रसन्नोभवतदेवतिसौदर्य्या
दिगुणयुक्तंरूपंमेदर्शयेतिभावः २५

मधुसूदनी टीका. १०

दंष्ट्राभिःकरालानिविकृतवेनभयंकराणिप्रलयकालानलसन्नि
भानिप्रलयकालवह्निसदृशानिचतेमुखानिदृष्ट्वैवनतानिप्रा

प्यभयवशेनदिशः पूर्वापरादिविवेकेननजानेश्रोनलभेव
शर्मसुखंस्वरूपदर्शनेपिहेदेवेशहेजगन्निवासप्रसीदप्रसन्नो
भवमांप्रति यथाभयाभावेनस्वदर्शनंजनंसुखंप्राप्नुयामि तथो
षः

[illegible] २५ ज्ञानेश्वरीटीका ११

भयंकरालिदंष्ट्राभिर्विकृतत्वान्मुखानिते प्रलयानलतुल्यानि
दृष्ट्वैवानिभयाद्भृतः २ पूर्वापरविवेकेननजानेदिशोभ्रमा
त् नलभेरंस्वंस्वामिंस्वरूपस्यापिदर्शने प्रसन्नोभवदेवेश
जगदाधारमांप्रति यथादेनिभयोभूत्वास्वदर्शनंसुखंलभे २५

नीलकंठीटीका ११

कालानलःप्रलयाग्निस्तद्वानि प्रसीदप्रसन्नःसुखदोभवेः
स्पष्टः २५

ज्ञानेश्वरीटीका सम्पूर्ण २५

रामकंठीटीका

किंच स्फुराष्टीमेनहाकं किंतुभगवन्तोदंष्टाकरालवक्त्रवदनंसंहारमह
तवक्त्रविकृतकृतोनपुरुषावेषणंते

[illegible] ॥

लासिकी दशमीटीका

किंच- तवकालरूपस्यदंष्ट्राभिःकरालानिविकृतत्वेनभयानकानि प्रलय
कालाग्निसदृशानिमुखानिदृष्ट्वैव समाधिकालेसाक्षात्कृत्यैवदिशः
पूर्वापरादिविभागेनेदानींमुक्तोनेसमाधिसंस्कारकृतेनजानेस्वं
चैनोपलभे हेदेवेशकालादेवनियंतः हेजगन्निवासजगदाश्र
येतिसाक्षात्कृतमामंत्रणाह्वयम् तंप्रसन्नोभवजगद्धितोप्रति २५

पंचोलीटीका

गी॰ टी॰ प॰

धृतिशमयोरलाभेकारणेनरमाह दंष्ट्रेति वक्त्रंदंष्ट्राकरा
लानिविकृतानिकालानलसन्निभानिप्रलयाग्निसदृशानि॰
तेनवक्त्राणिदृष्ट्वैव अहंपूर्वापरविभागेनदिशोनजानेदिग्
मूढोस्मिचपुनःशर्मसुखनलभेहेदेशजगन्निवासप्रसीदप्र
सादंकुरुप्रसन्नोभव २५ ५वे

एवंवीरसमिहोधिनी॥

कालानलसन्निभानि कालाग्निरुद्रवत्प्रलयाग्निरिव दंष्ट्राकरा
लानि तेनस्वानि दृष्ट्वैवनत्वसमकालंभीतत्वाच्चलितेप्यहंतो पि
दिशोदेशविभागान्पूर्वापरान्नजानेधीदिभ्रमदतोस्य
तएवनलभेचशर्मेतिसर्वथाप्रणष्टंमांप्रत्यधुनाजगन्निवा
सत्वात्प्रसीद येनाहंसुखितोभवामीत्यभिप्रायः २५॥

मधुभाष

२५॥

भाष्य अनुवाद

और हे देवेश हमारा मुख देखि डरके मारे हमें दिशा भूलि गई और सुख पावते नहीं हे जगन्निवास अब प्रसन्न होउ कैसा मुख देखि डर भया सो कहते कि बड़े कराल दोनों से भयानक जो प्रलयाग्नि के समान हैं २५

चौपई

दंत कराल तोरे मुख नाना देखि कालानल हिं समाना
भा मैं दिशा हिं न लहौं सुखलेशा होप्रसन्न जगवास महेशा
२५॥

d)

श्रमीचान्येधृतराष्ट्रस्यपुत्राः सर्वेसहैवाव
निपालसंघैः भीष्मोद्रोणःसूतपुत्रस्तथा
सौसहास्मदीयैरपियोधमुख्यैः २९

शाङ्करभाष्यटीका. १

येभ्योमम पराजयशङ्का प्रागेव आसीत्सा चापगता यतः
श्रमी चेति श्रमी चान्ये धृतराष्ट्रस्यदुर्योधनप्रभृतयस्त्वरमाणावि
शन्तीति यथहितेन संवत्यः सर्वे सहैव संहताः अवनिपाल
संघैः अवनिपृष्ठी पालयन्तीत्यवनिपालास्तेषां संघैः किञ्च भीष्मोद्रो
णः सूतपुत्रः कर्णस्तथासौ सहास्मदीयैरपि पृष्ठपुत्र प्रभृतिभि
र्योधमुख्यैः योधानां मुख्यैः प्रधानैः सह २९

आनन्दगिरिकृतटीका. २

अस्माकं जये परेषां पराजयश्चादिदृक्षवे पश्यामीत्याह येभ्यइति
तत्र हेतुत्वेन श्लोकमवतारयति यतइति २९

स्वामिकृतटीका ३

यद्यस्मदृष्टमिच्छसिश्रवनेनास्मिन्संग्रामेभाविजयपराजयादिकंच
ममदेहेपश्येति यद्भगवतोक्तंतदिदानीमपपन्नाह श्रमीचेतिपं
चभिः श्रमीधृतराष्ट्रस्यपुत्राइयोधनाद्यःसर्वेवनिपालानामजय
द्रथादीनांराज्ञांसंघैःसंहैवनववक्त्राणिविशन्तीतुमत्रेणोक्त्वयः त
थाभीष्मद्रोणस्तथासौसूतपुत्रःकर्णोमत्तकेवलेनयेवविशन्ति अ
पितुप्रतियोद्धारोयेस्मदीयायोधमुख्यास्तैरविदृष्टक्रमात्सहयस्तैः
सह २९

विशालभाष्यटीका. ४

स्पष्टार्थं २९

रामानुजभाष्यटीका. ५

श्रमीचेति वक्त्राणीति श्रमीधृतराष्ट्रस्यपुत्राइयोधनाद्यः सर्वेभीष्मः
द्रोणःसूतपुत्रःकर्णस्तथासौसहास्मदीयैरवनिपालसमूहैः सर्वैरस्मदीये
सहयकैरियोधमुख्यैः २९ श्रभिनवगुप्तकृतटीका. ६

स्पष्टार्थं २९

सचपार्थो भगवतः श्रेष्ठत्वादिकं सर्वैश्वर्यं मात्मात्मन्यनन्यसिद्धं वभगवति सर्वात्मनिधार्तराष्ट्रादीनां
उपसंहारमनागतमपिनत्वसादलब्धनदिष्टेनचत्वयापश्यन्निदंप्रोवाच ॥

परमार्थप्रपादीका. २

अथाग्रदसर्वेपश्यामीत्याह अमीचेत्यादिभिः तत्रराजेमरिष्यमा
णानोभक्तानामभक्तानांचभाविनोदृष्टप्रमाणगतिप्रश्नमेनानिरूप
यति तत्रभीष्मोद्रोणः सूतपुत्रः कर्णस्तथासौमदत्तोरोभगवद्
रूपाश्चतथाविधैरेवास्मदीयैर्योधमुख्यैः शिखंडिधृष्टद्युम्नादिभिःस
ह्यत्रपुनर्भवप्रदसंज्ञोविशंति तथाश्रमीकूटकारित्वेनातनाधिप
नचनामैवप्रसिद्धाधृतराष्ट्रस्यपुत्राउर्योधनादयः शासनादयएकोन
रशतंतथाविधैरेवावनिपालानांसंघैःसहत्वरमाणाःपातना
यैवेगवन्नरास्त्ववक्राणिविशंति २९

वनमाली टीका. ८

पोरुषानोजयमन्येषांचपराजयंसर्वेदाद्रष्टुमिष्टेपश्यममदेहेगुरु
केशयद्यामदृष्टुमिच्छसीतिभगवतादिष्टमधुनापश्यामीत्याह सोदरौ
अमीचेति एतैर्भीष्मोवधृतराष्ट्रस्यपुत्राउर्योधनादयःशतेषु
पुत्रेषुविनासर्वेनरमाणाविशंतीत्यग्रिमेणान्वयः अतिशयसूचे
कत्वेनक्रियापदभूम्नत्वेगुणएव सहैवावनिपालानोशास्त्रादीनां
संघैःसोविशंति नकेवलंदुर्योधनादयएवविशंतिकिंतुनेयत्ते
नसर्वेमभाविनोभीष्मद्रोणःसूतपुत्रःकर्णस्तथासौमदत्तो
यैः परकीयैरिवास्मदीयैः परकीयैरिवात्मदीयैः धृष्टद्युम्नादिभि
र्योधमुख्यैःसहत्वाविशंतीतिसंबंधः २९

क्रमसंदर्भटीका. ५

एवमखिलचेतनाचेतनात्मकस्यविश्वस्यभगवदधीनस्थिति
प्रवृत्तिनिवृत्तिमुक्तेनभगवद्देहएवदृष्टमित्युक्तमधुनाराजवंशा
पचितोभयोःसेनयोःस्थितानांसगणसराजाणांसंदरूपभूभागव
तारणमनागतमपिभगवद्वत्तादिवत्तथाविधाकारेभगव
द्रूपएवदृष्ट्वा पार्थोःनिद्राकुलमनास्तत्रमेवभगवन्तमाहपञ्च
भिः अर्जुनेचेतिधृतराष्ट्रस्यधृतोराष्ट्रोयेनसतस्यसेनेनाधर्मेणयेन
व्याकुलमनास्तत्रमेवभगवन्तमाहपञ्चभिः अर्जुनेचेतिधृतराष्ट्र
स्यधृतोराष्ट्रोयेनसतस्यसेनेनाधर्मेणयेनयकिंचित्कालराज्यलब्धं
पुत्राःपालितास्तस्तद्राज्यस्यनेषांपुत्राणांचांतकालोदृश्यतेइतिसूचि

तम् पुत्रापक्षोनशतेऽर्योधनादयःसहोदराः अमीयेपाण्डवे
भ्योःसपुत्रेभ्युत्सयास्वसैमरणमविगणय्यस्थिताःइत्यनुन
हिषोपुथिराद्दिपेचानोकूणाचार्योस्त्थामप्रभृतीनोचपुत्र
मरणभावनेसूचितम् तथाभीष्मद्रोणश्चतथासोसूतपुत्रः
कर्णःअसाविसनेनतत्सखविद्वेष्टृत्वेनोक्तम् वशाद्दादस्मा
कंयुथिष्ठिरादीनामपिप्रतिविन्ध्यचेतिकचाभिमन्युप्रभृतयः
सर्वेपनेश्ववनिपालैःसर्वैःशस्त्रज्ञयद्यादीनामवनिपालानो
राजोसेनैःसमूद्देःसह केवलंतयवकितसद्दास्मदीयैरपि
केविदस्मदीयैःपरकीयैर्योधमुख्यैर्धृष्टद्युम्नेविराटादिभि स्स
हतोविश्वाश्रयमतिभयंकरंविशंतीत्यर्थादाः अत्रभयसूच
कत्वेनक्रियापदस्यसूत्रत्वेगुणएवनतदोषोभवतीत्यर्थः यः
स्मादीयाधृष्टद्युम्नादयस्तेपिप्रविशंतीतिसहोक्तिरलङ्कारः २९

मधुसूदनी टीका २०

अमीचधृतराष्ट्रस्यपुत्राइर्योधनप्रभृतयः भ्रातेसोदराः युयु
त्सुविनासर्वेलोकरक्षणार्थंविशंतीत्यनेनान्वयः अतिभयसू
चकत्वेनक्रियापदंभूत्वतमनगुणएवसद्देवावनिपालानो
शस्त्रादीनोराजोसेनैः सोविशंतिनकेवलंइर्योधनादय
वविशंतिकिंतुअन्येतेनसर्वैःसंभावितोपिभीष्मोद्रोणः
सूतपुत्रःकर्णःतथासोमदत्तोमहेष्वा सद्दास्मदीयैरपिपर
कीयैरिवदृष्टद्युम्नप्रभृतिभिर्योधमुख्यैस्त्वाविशंतीतिसंब
धः २९ सदानंदी टीका ११

येभ्यःपराजयाशंकामम्मासीत्तेत्वमीइर्योधनप्रभृतयो
धृतराष्ट्रसुताःभ्रात २ शस्त्रादीनोमहीपानोसमूद्देःसहते
विलाःलोविशंतितथाभीष्मद्रोणकर्णादयोपमी २अन्येत
तेनयेलोकेशूराःसंभावितादृहते अस्मदीयैःसहानेकैर्धृ
ष्टद्युम्नादिभिस्तथा योधमुख्यैर्विशंतित्यामितेनेनान्वयास्व
च २९ नीलकंठी टीका १२

अमीत्वांविशंतीत्यग्रमश्लोकादयकृष्यते २९

लालिकी वक्त्रपंक्तीटीका

किंच- अमीधृतराष्ट्रस्यपुत्राइर्योधनादयःसर्वेशतंसहजाः अवनिपाला
नांशल्यजयद्रथप्रभृतीनांराज्ञांसमूहैस्सहैवनोकालरूपंविशं
तीत्यनेनासंबंधः येभ्यइदमाकारवैवश्येनानभ्युपगमेपि
हृन्मध्यविशंतीतिवर्तमानत्वेनोक्तिः एवमग्रेऽपि तथाभीष्मोद्रोणाः
सूतपुत्रोसौकर्णिः अस्मदीयैस्तेषांप्रतियोद्धृभिर्दृष्टद्युम्नादिभिः स
हितेसर्वेविशंति २९

पंचोलीटीका

येभ्योममपराजयशंकाप्रागासीत्साचापगताइत्याह अमीचे
तिपंचभिः वक्त्रैः अमीधृतराष्ट्रस्यपुत्राः इर्योधनप्रभृतयः न
थाभीष्मोद्रोणः असौसूतपुत्रः कर्णिः अवनिपालसंघैः राज्ञां
समूहैः वास्मदीयैरपिदृष्टद्युम्नप्रभृतिभिःयोधमुख्यैः सहित
श्माणाः त्वांविशंतितेत्वरमाणाः दंष्ट्राकरालानिदंष्ट्राभिः
विकृतानिभयानकानि भयंकरानि वक्त्राणिविशंतित्वमुखे
प्रविष्टानामध्येकेचित्चूर्णीकृतैरुत्तमांगैः शिरोभिः दशना
नरंतरेषुदंतविवरेषुविलग्नाःसंदृश्यंतेकेचिदवदृश्यंते २९

रणवीरसमिहोथिनी॥

अमीचेति अमीधृतराष्ट्रस्यपुत्राइर्योधनादयोवनिपालसंघैः
सहसर्वे तथाभीष्मोद्रोणोसौसूतपुत्रश्चकर्णि इत्येतेचास्मदी
येर्दृष्टद्युम्नादिभिर्योधमुख्यैरपिसहसर्वे तेत्वरंदंष्ट्राकरालान्य
तएवभयानकानि वक्त्राणिदृष्ट्वात्वरमाणाः ससंभ्रमास्त्वां
विशंत्यर्थात्तेजस्यंतर्हिताभवंतीति तत्रकेचित्चूर्णितोत्तमां
गैर्दशनानांदंतानांयान्यंतराणिसंधिछिद्राणि तेषुविलग्नाविव

लीनाःसंदृश्यंतेऽपलक्ष्यंते नत्वोपलक्षणमात्रं चूर्णितैरिति चूर्णि
तैःक्षरेरुत्तमांगैः शिरोभिरुपलक्षणभूतैरेव तत्संधिविली
नाऽपलक्ष्यंते नत्वन्यावयवैरित्यर्थः २९॥

मधुभाष

२९॥

वक्त्राणिते नवरमाणविशन्तिदंष्ट्राकरालानिभयानकानि केचिद्विलग्नादशनान्तरेषुसंदृश्यन्ते चूर्णितैरुत्तमाङ्गैः २१

श्रीधरभाष्यटीका १

किञ्च वक्त्राणीति वक्त्राणिमुखानिते नव नरमाणस्तवराक्षसाः सन्तोविशन्ति किं विशिष्टानि दंष्ट्राकरालानि सुतरांनि भयानकानि भयङ्कराणि किञ्च केचिन्मुखानि प्रविष्टानां मध्ये विलग्नादशनान्तरेषुसंसक्तमिव भवति संदृश्यन्ते उपलभ्यन्ते चूर्णितैश्चूर्णीकृतैरुत्तमाङ्गैः शिरोभिः २१

श्रानन्दगिरिकृतटीका २

न केवलं दुर्योधनादीनामेव पराजयः किन्तु भीष्मादीनामपीत्याह किञ्चेति भगवद्रूपस्याकस्मिकत्वेन नरमाह किञ्चेति प्रविष्टानां मध्ये केचिदिति सम्बन्धः २१

स्वामिकृतटीका ३

वक्त्राणीति एतेसर्वेनरमाणयावनलवदंष्ट्राभिर्विकृतानिभयंकराणिवक्त्राणिविशन्तितेषांमध्येकेचिच्चूर्णीकृतैःशिरोभिरुपलक्षितादशनमेषुसंश्लिष्टादृश्यन्ते २१

विशाखभाष्यटीका ४

स्पष्टार्थं २१ ॥ ॥

रामानुजभाष्यटीका ५

नरमाणदंष्ट्राकरालानिभयानकानितववक्त्राणिविशन्ति नत्रकेचिच्चूर्णि तैरुत्तमाङ्गैर्दशनान्तरेषुविलग्नाःसंदृश्यन्ते २१

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २१ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

किंभूतानिवक्त्राणिदंष्ट्राकरालानि अतएवभयानकानितत्रकेचिद्दृश्यन्तेनिचूर्णीकृतैरुत्तमाङ्गैःशिरोभिर्दशनान्तरेषुदशनसंधिषुविलग्नाःसंश्लिष्टाः दृश्यन्ते २१

वनमालीटीका ८

अमी चत्वां धृतराष्ट्रस्य पुत्राः सर्वे नेतव दंष्ट्राकरालानि भयानक
नि वक्त्राणि त्वरमाणा विशंति तत्र के चिद्दशनांतरेषु संलग्नाः दृश्यंते चूर्णितै रुत्तमांगैः शिरोभिर्वि
शिष्टा दशनांतरेषु विलग्ना विशेषेण संलग्नाः दृश्यंते तेमया सम्यग्गमे
देहेन २७

क्रमसंदर्भनी टीका॰ ५

किंच वक्त्राणीति पूर्वोक्तेन सर्वैव त्वरमाणा अतिवेगयुक्ता सेतत्तेन
व वक्त्राणि कालानलसन्निभानि मुखानि विशंति प्रविशंति किंभूता
नि दंष्ट्राकरालानि दंष्ट्राकरालाभयंकराणि मुखानि अतएव भया॰
नकानि रतिशयभयरूपाणि तेषां मध्ये केचित् कतिचित् वीरास्तू
र्णितैः शकलीभूतैरुत्तमाङ्गैर्मस्तकैस्सहिताः दशनांतरेषु नव दं
तमध्येषु विलग्नास्सन्तिष्ठाः संदृश्यंते तेमयैतिशेषः २७

मधुसूदनी टीका॰ ६

अमीच त्वां धृतराष्ट्रस्य पुत्रा प्रभृतयः सर्वेपि ते तव दंष्ट्राकरालानि भया
नकानि वक्त्राणि त्वरमाणा विशंति तत्र च केचित् चूर्णितै रुत्त
मांगैः शिरोभिर्विशिष्टा दशनांतरेषु विलग्ना विशेषेण संलग्नाद
र्शनेमया सम्यग्गमेदेह
२७

सदानंदी टीका॰ ११

तव दंष्ट्राकरालानि वक्त्राणि तित्वरान्विताः विशंति भीषणमेते
सर्वेऽर्थोपनादयः २ तत्र चूर्णीकृतैः केचिच्छिरोभिः संयुताभटाः
दंतांतरेषु संलग्नादृश्यंते तेमयास्फुटं २७

नीलकंठी टीका॰ १२

ते भीष्मादयः उत्तमांगैः शिरोभिः अयंभावः धृतराष्ट्रस्य पुत्राः पा
पिष्ठाः भवेत्तमेवंविधं लोकप्रसिद्धं विशंति पापात्तद्रूपेणस्वपापुस्मा
नस्थितान्नरकानेवगच्छंतीतितत्रो विशंतीत्येवोक्तं भी
ष्मादयस्तु भक्तायतोग्रिर्ब्राह्मणेवदास्यप्रसूतास्तद्गवतोमुखंप्र
विशंतीतिवैधम्यमतिसूचनार्थंतो धृतराष्ट्रस्य पुत्राविशंतिभीष्मा
दयस्तेवक्त्राणिविशंतीतिविभागदर्शनेनेयुक्तमिति २७

ज्ञानेश्वरीका

[redacted] २७

रामकवीरीका

नानारूपैः पुरुषैर्वीर्यमानाविशंतितेवक्त्रमविन्यरूपम् योधिष्ठिरा
धानराष्ट्रस्त्वयोधाः शस्त्रैः कृत्तविविधैः सर्वएव वेत्रजसानिरुतानून
मेवतथाहीमेत्वच्छरीरंप्रविष्टाः २७

लासिकी [redacted]तीका

किंच अमीहर्योधनादयोदंष्टाभिर्विकरालानिभयंकराणित्ववक्त्राणिधावं
तोविशंति तत्रचैकेविद्योधाश्चूर्णितैः शिरोभिर्विशिष्टदंतसंधिषु
संश्लिष्टदृश्यंते [redacted] २७

पंचोलीटीका

स्पष्टार्थे २१

रणवीरसमिद्धोधिनी॥

स्पष्टार्थः २७॥

मधुभाष्य

२७॥

और ये दुर्योधनादिक धावते हुये हमारे विकट दल बल
मुखमे प्रवेश करते हैं और तिनके बीच कोई कोई थोड़ा म
लक चूर्ण हुये हमारे दांतो के मध्य सन्धिमे लपटे से देख
पड़ते हैं २७

चौपई

तोमुखमांहि परहि यहसहसा दंतकरालभयानक सहसा
कोईक दंतनमांहि लगे हैं देखिय चूर्णितउपमा किते हैं २७

यथानदीनांबहवोऽम्बुवेगाःसमुद्रमेवा
भिमुखाद्रवन्ति तथातवामीनरलो
कवीराविशन्ति वक्त्राण्यभिविज्वलन्ति

२८ शाङ्करभाष्यटीका॰१

कथं प्रविशन्तिमुखानीत्याह यथा नदीनामिति यथा नद्यो
नां स्रवन्तीनां बहवोऽनेकेऽम्बूनां वेगाश्चम्बुवेगास्तद्रूपविशेषाः
समुद्रमेवाभिमुखाः प्रतिमुखाः द्रवन्ति प्रविशन्ति तथा त
द्वत्तव अमी भीष्मादयोनरलोकवीरामनुष्यलोकप्रधानाविशन्ति
वक्त्राण्यभिविज्वलन्ति प्रकाशमानानि २८

आनन्दगिरिकृतटीका॰२

उभयोरपि सेनयोरवस्थितानां राज्ञोभगवन्मुखप्रवेशनं नि
दर्शनेन विशदयति कथमित्यादिना २८

स्वामिकृतटीका॰३

अवशप्रवेशमेवदृष्टान्तेनाहयथेति नदीनामनेकमार्गप्रवृत्ता
नांबहवोजलानांवारीणांवेगाःप्रवाहाःसमुद्राभिमुखाःसंतोयं
यासमुद्रमेवद्रवंतिप्रविशंति तथामीयनरलोकवीरास्त्वभिता
विज्वलंतिसर्वतःप्रदीप्यमानानितववक्त्राणिप्रविशंति २८

पिशाचभाष्यटीका॰४ ॥ ॥

स्पष्टार्थं २८

रामानुजभाष्यटीका॰५

यथेति एतेनरलोकावहवोनदीनामंबुप्रवाहैः २८ समुद्रमिवत्

अभिनवगुप्तकृतटी॰६ ॥ ॥

स्पष्टार्थं २८

परमार्थप्रकाशटीका॰७

यथा दृष्टान्तमाह यथेति यथाबहवोनानामार्गप्रवृत्ताः
नदीनामंबुवेगाःप्रवाहाःसमुद्रमेवद्रवंतिप्रविशंतिप्रविशंच
समुद्राकारमेवंतितथातवाभिमुखा अमीकुरुनरलोकवीराः
स्मारुक्षणास्तेनाभीष्मद्रोणादयस्त्वांविशंति २८

वनमालीटीका. ६

राज्ञोभगवन्मुखप्रवेशनेनिदर्शनमाह यथेति यथानदीना
मनेकमार्गप्रहृतानोवहवोवेगावेगवंतःप्रवाहाः
समुद्राभिमुखाःसंतः समुद्रमेवदृवंतिविशंतितथानवामीन
रलोकवीराविशंति वक्त्राण्यभितःसर्वतोविज्वलंति २८

क्रमसंदर्भनयन्नीति ५

राजवीराणांविश्वरूपमुखप्रवेशनेदृष्टांतमाह यथानदीनामि
ति यथेतिदृष्टांतेनदीनानदनदीनांवहवोःनेकाश्चोद्भवेगाः ग्रे
हृतानीराणांवेगाःवेगवंतःप्रवाहाः अभिमुखाः सन्मुखास्तनः
समुद्रमेवदृवंतिप्रविशंतितथेतिदृष्टांते अमीनरलोकवीराःन
रलोकेणनरलोकवर्तिनःसमस्तराजलोकेसेनावीराःशूरास्तवविश्वरू
पस्याभिविज्वलंति अभिसर्वतोविज्वलंतिप्रदीप्यमानानिवक्त्राणि
मुखानिविशंतिप्रविशंति अयंभावशब्देःज्ञानपूर्वकंनेवदृष्टांतो
वोध्यः २८

राज्ञोभगवन्मुखप्रवेशनेनिर्दर्शनमाह

मधुसूदनी टीका. ९

यथानदीनामनेकमार्गप्रहृतानोवहवः ग्रेहृतोज्वलानोवेगाःप्र
वाहाःसमुद्राभिमुखाःसंतःसमुद्रमेवदृवंतिविशंति तथातवा
मीनरलोकवीराविशंतिवक्त्राण्यभितःसर्वतोज्वलंतिअभिविज्व
लंतीतिवापाठः

२८

सदानंदीटीका ११

कथंनेप्रविशंतीत्यनेदृष्टांताभ्यांनिदर्शयंते वक्त्रमार्गप्रहृतानांन
दीनांवहवोप्यपि २ वेगावंतःप्रवाहावेसमुद्राभिमुखायथा स
मुद्रंप्रविशंतेवंनरलोकवीरामहानराः भीष्मद्रोणादयःसर्वेतव
वक्त्राणिसर्वतः प्रविशंतिज्वलंतेतेमहाकालेनयोजिताः २८

नीलकंठीटीका १२

एतमेवमर्थंदृष्टांतमाह यथेति नववक्त्राणिविशंतीतिसंबंधः
अभिविज्वलंतिसर्वतःज्वलमानानि २८

आनंदटीका सप्तषष्टितमम् २८॥ राज्ञोकालमुखप्रवेशेनिदर्शनमाह॥

रामकंठीटीका सप्तषष्टितमम् २८

लालिकी ~~रत्नावली~~ टीका

प्रवेशेनदृष्टांतमाह॥

यथावद्वमार्गप्रवहंतीनांनदीनांजलप्रवाहः समुद्राभिमुखाः समुद्रमेवद्रवंतिप्रविशंतितथामीनरलोकवीराः सर्वतोदीप्ता णिनवमुखानिविशंति

[illegible] २८

पंचोलीटीका

भगवान्मुखेप्रवेशंदृष्टांतेनयोजयति यथेति यथानदीनां बहवश्चनेकाश्चंडवेगाः समुद्रमेवाभिमुखाद्रवंतिविशंतितथा तद्वत्अमी भीष्मादयोनरलोकवीराः मनुष्यलोकशूराः तवअ भिविज्वलंतिप्रकाशमानानिवक्त्राणिप्रविशंति २८

रणवीरसमिद्धोयिनी॥

अथपुनरमुमेवार्थंनिदर्शयति यथेति नदीनां बहवोंडुवे गा जलप्रवाहाभिमुखा अभितःसर्वतोमुखंगतिर्येषांतेभि मुखानिरर्गलगतिकाअपि यथासमुद्रमेवगच्छंति तथा मीनरलोकवीरा नरलोकोमनुष्यलोकस्तत्रापियेवीरवीर पुरुषास्तेपितवाभिविज्वलंति प्रज्वलद्रूपाणिवक्त्राणिविश ंतीति २८॥

मधुभाष

२८

भाषा अनुवाद

अब उनके प्रवेश विषय मे दृष्टान्त कहते हैं कि जैसे अनेक
अनेक मार्ग से नदियो के धारा प्रवाह समुद्रके अभिमुख हो
शोभये जायकर समुद्रमे प्रवेश करते हैं तैसेही ये नरलोकके
वीर सकल ज्वालासमान तुमारे मुखमे पैठते जाते हैं २८

चौपई

जैसे नदीके बहु जल वेगहि सागरसनमुख यहसभ चलहि"
तिमि यह भूमिलोकके वीरा तवमुख ज्वलित प्रवेशहि अधीरा २८

91

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः तथैव नाशाय विशन्ति लोका स्तवापि वक्त्राणि समृद्धवेगाः २९

शाङ्करभाष्यटीका. १

ननु किमर्थं प्रविशन्ति कथञ्चेत्याह यथेति यथा प्रदीप्तं ज्वलनं अग्निं पतङ्गाः पतिंगाविशन्ति नाशाय विनाशाय समृद्धवेगाः समृद्धः प्रवृद्धो वेगो गतिर्येषां ते समृद्धवेगाः तथैव नाशाय विशन्ति लोकाः प्राणिनस्तवापि वक्त्राणि समृद्धवेगाः २९

आनन्दगिरिकृतटीका. २

प्रवेशप्रयोजने तत्कारविशेषञ्चोदाहरणान्तरेण स्फोरयति ननु किमर्थमित्यादिना २९

स्वामिकृतटीका. ३

अवशत्वेन प्रवेशेनदीवेगदृष्टान्तउक्तः बुद्धिपूर्वकप्रवेशेदृष्टान्तमाह यथेतिप्रदीप्तंज्वलनमग्निंपतंगाःशलभाबुद्धिपूर्वकं समृद्धोवेगोयेषांतेयथानाशायमरणायेवविशंतिनष्टेवलोकाएतेजनाअपितवमुखानिप्रविशंति २९

विज्ञानभाष्यटीका. ४

स्पष्टार्थं २९ ॥ ॥

रामानुजभाष्यटीका. ५

यथेतिप्रदीप्तंज्वलनमिवचशलभास्तवक्त्राण्यभिज्वलंति स्वयमेवत्वरमाणाः आत्मनाशाय विशंति २९

अभिनवगुप्तकृतटी. ६

स्पष्टार्थं २९ ॥ ॥

परमार्थीप्रपादी टीका. ७

तथायेतेत्रअभिज्वलंतिअभितोज्वलन्त्यमानानिवक्त्राणिविशंतिनेत्युक्तं बुद्धिपूर्वकंसमृद्धोवेगोयेषांतेशलभाः पतंगानाशायसमृद्धवेगप्रदीप्तंज्वलनंविशंतिनष्टेवलोकास्तवापिनोपितवक्त्राणिविशंति २९

वनमालीटीका. ८

अबुद्धिपूर्वकप्रवेशेनदीवेगदृष्टांतमुक्त्वा बुद्धिपूर्वकप्रवेशेदृष्टांत

माह यथेतियथापतंगाः शलभाःसमृद्धवेगाः संतोबुद्धिपूर्वकं
प्रदीप्तंज्वलनंविशंतिनाशायमरणायैव तथैवैतेलोकाइर्यौध
नादयःनाशायविशंतिसर्वेपिनाशायविशंतिसर्वेपिनाशायत
ववक्त्राणिसमृद्धवेगाःबुद्धिपूर्वकप्रवादेणविशंति २५

रामभद्रवेजयन्तीटी ५

किंचात्रदृष्टांतमाह यथाप्रदीप्तमिति यथानाशायात्मविनाशा
यैवसमृद्धवेगाःसमृद्धःसमृद्धोवेगोयेषांतेतथासंतःपतंगाः
शलभाःप्रदीप्तंप्रज्वलितंज्वलनमनलंविशंतितथात्मविनाशाये
वसमृद्धवेगाःलोकाइर्यौधनप्रभृतयःसर्वेपितेजनासववित्ता
कारस्यवक्त्राणिमुखानिप्रविशंति अत्रस्ववशेनज्ञानपूर्वकप्रवेश
नेदृष्टांतोबोध्यः २५

मधुसूदनीटीका· ९ बुद्धिपूर्वकप्रवेशेदृष्टांत माह यथापतंगाः शलभाःसमृद्धवेगाःसंतोबुद्धिपूर्वंप्रदीप्तंज्वलन
विशंतिनाशायमरणायैव तथैवनाशायविशंतिलोकाएतेइ
र्यौधनप्रभृतयः सर्वेपितववक्त्राणिसमृद्धवेगाबुद्धिपूर्वंमनाः
यस्मा

२५

सदानंदीटीका· १०

यथापतंगाउड्डनवेगासंबुद्धिपूर्वकं विशंत्यग्निंज्वलंतंचस्वना
शायतथैवते इर्यौधनादयःसर्ववेगवंतोमुखानिते मरणा
यविशंतीमेबुद्धिपूर्वंप्रवादतः २५

नीलकंठीटीका· १२

बुद्धिपूर्वकमेवतेनष्टवक्त्राणिप्रविशंतीतिसदृष्टांतमाह यथाप्र
दीप्तमिति २५

श्रीधरीटीका स्पष्टार्थम् २५

रामकंठीटीका

एतल्लोकपंचकेनिगदितमात्मानमग्नंकिंतुतववक्त्राणिविशंतीति
वक्रवैवचनेनरंध्रकरालानीत्यादिविशेषणविशिष्टानिवक्त्राण्युक्त्वा
विंशद्रूपंवक्त्रंतववविशंति इतियउक्तंतत्रकालपुरुषमेवधिक्षोवा

कृतिविशेषरूपानानाविधशक्त्यपकस्योत्तरीयायोपरस्योसामान्यश
क्तीपरिणामेति रतिर्भगवतः सर्वशक्त्याश्रयत्वप्रतिपादनपरंबोद्धव्यम्
यतपकवक्त्रशब्देनप्रतिपादितायाःसामान्यशक्तेरव्यपदेशात्रविंत्य
रूपत्वेनविशेषणमुक्तम् तथाहि रमेतच्छरीरस्यतेननदेवस्फुटीकृतं
अत्रश्लोकपंचकेसार्धेनानारूपेत्यादित्वच्छरीरंप्रविष्टइत्यंतंश्लो।
कसार्धकंश्लोकसाम्यार्धेनपठंतिकेचित् कश्चिन्नवरेणसानिहतान्न
मित्यादिश्लोकार्धमनेनाभिप्रायेणनपठनीदृतदनुरूपत्वकदर्शनाद्वा
रतेच तत्रसार्धश्लोकप्रणयनाद्वासमनेःश्लोकपंचकंसार्धमेवपठि
तं[२५]

लासिकी [illegible] स्पष्टार्थः [illegible]२५ वेवश्येनप्रवेशेनदीवेगदृष्टांत
मुक्तास्तांत्रैणकेषांचिद्योधशब्दा नाप्रवेशदृष्टांतमाह ॥

पंचोलीटीका

अवश्यत्वेनप्रवेशेनदीशशब्दवेगदृष्टांतउक्तः बुद्धिपूर्वकप्रवेशे
सप्रयोजनदृष्टांतमाह यथाप्रदीप्तमिति यथासमुद्भवेगाः अ
तिरंहसाशुक्ताःपतंगाशलभाप्रदीप्तंज्वलनमग्निंनाशायविशं
तिनथैवलोकाःप्राणिनःनाशायसमुद्भवेगाःनवक्त्राणिविशं
ति २५

रणवीरसमिद्धोथिनी॥

यथेति यथाग्न्योनिदर्शने प्रदीप्तंनाज्वल्यमानंज्वलनंग्नि।
वावंतपतंगाःपक्षिविशेषाः समुद्भवेगाअपि नाशायस्वा
त्मानंस्वयमेवनाशयितुंयथाविशंति नथैवलोकाःसमुद्भवे
गाःप्रबलाअपि नवक्त्राणि नाशायविशंतीति २५॥

मयूखाख्य

२५

भाषा अनुवाद

वेवश रूप प्रवेश मे नदी का दृष्टान्त कहि कर अब बुद्धि पू
र्वक प्रवेश करने मे दृष्टान्त करते हैं कि जैसे बड़े वेग औ
उत्साह से पतङ्ग जो पांखी ने नाशके निमित्त दीप शिखामेंजा
य गिरते औ मरते हैं तैसेही अति वेगसे ये सब वीर मनुष्य
नाशके अर्थ तुमारे सन्मुख मे आय कर प्रवेश करते हैं २४

चौपई

जलित अग्नि मे सलभ प्रवेषैं नाशहि को निज जव गुन जैसें
तिमि सम सबल तवसादि समादि बहुत वेग कर लोक हि
जाहि २५ ॥

लेलिह्यसेग्रसमानः समन्ताल्लोकान् सम
ग्रान् वदनैर्ज्वलद्भिः तेजोभिरापूर्य्य जगत्
समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥

शाङ्करभाष्यटीका १

त्वं पुनः लेलिह्यसेइति लेलिह्यसे आस्वादयसि ग्रसमानोऽन्तःप्र
वेशयन् समन्तात् समन्ततो लोकान् समग्रान् समस्तान् व
दनैर्वक्त्रैर्ज्वलद्भिर्दीप्यमानैस्ते जोभिरापूर्य्य मेव्याप्य जगत् सम
ग्रं सहाग्रेण समस्तमित्येतत् किञ्च भासोदीप्तयस्तवोग्राः क्रू
राः प्रतपन्ति प्रतापं कुर्वन्ति हे विष्णो व्यापनशील ॥

नं आनन्दगिरिकृतटीका २

योद्धुकामानां राज्ञां भगवन्मुखप्रवेशप्रकारं प्रदर्श्य तस्मा द
शार्णां भगवतस्तद्वक्त्राच्च प्रहृत्ति प्रकारं प्रत्याययति त्वं पुन
रिति भगवत्प्रहृत्तिमेव प्रत्याय तदीयभासां प्रहृत्तिं प्रकटय
ति किञ्चेति ॥

स्वामिकृतटीका १

ततःकिमतआह लेलिह्यसइति ग्रसमानोगिलन्समग्रांल्लोका
न्सर्वानेतान्वीरान् समंतात्सर्वतोलेलिह्यसेतिशयेनभक्ष य
सिकैर्ज्वलद्भिर्वदनैःकिंचरेविस्तृतवभासोदीप्तयस्तेजोभिःवि
स्फुरणैःसमस्तंजगत्व्याप्यतीव्राःसमंःप्रतपंतिसंतापयंति ॥

पिशावभाष्यटीका ४

लेलिह्यसेत्यर्थमास्वादयसि ॥

रामानुजभाष्यटीका ५

लेलिह्यसइति राजलोकान्समग्रान्ज्वलद्भिर्वदनैःसमंततःको
पावेशेनग्रसमानःतदुपरासक्तमोष्ठपुटादिकंलेलिह्यसेपुनःप
नर्लेहनेकरोषि तवानिशंरोषाभासोग्रमयःतेजोभिःस्वकीयैःप्र
काशैर्जगत्समग्रमापूर्यप्रतपंति ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ॥

परमार्थप्रपाटीका.

लेलिह्यसेऽसमग्रानल्लोकान्समन्ततोवदनैर्ज्वलद्भिः आपूर्य मानः मिलन्सन्प्रभारूपैर्लोकान्लेलिह्यसेस्वतेजोभिः स्वकरणैः समग्रांल्लोकान् समंतात्सर्वतः प्रज्वलद्भिर्वदनैः आस्वादयसि भोजयसि विलोडयसि च हे विष्णो उग्राभासोदीप्तयः उग्रा भयंकराः आभासः प्रभा यासां ताः उग्राभासः तीव्रतेजसः दीप्तयः प्रज्वलन्त्यः तव विष्णोः वपूंषि शरीराणि प्रति प्रतापं तापं कुर्वंतीति प्रतापनाः अतीव प्रतापनाः अतिप्रतापनाः सर्वं जगत्तापयंतीत्यर्थः अत्र पूर्वोपक्रांताऋग्वेदश्रुतिरपि रक्षोहणोवाजिनमाजिधर्मिमित्रंप्रथिष्टमुपयामिशर्मणि शोभनोग्निः क्रतुभिःसमिद्धः सनोदिवासरिषःपातु नक्तं १ अथा दृष्टार्थविधायानुवादोऽत्रापिथत्वंसन् २ भाष्यं रक्षोहणं रक्षोहणं - एकाधिकाविंशतिः सप्तम्यभिहरणेपरिव्राजेनिवेषा नष्टेनिसर्वानुक्रमः तत्रप्रथमारक्षोहणमिति रक्षोहणंरक्षसां हंतारं वाजिनंबलवंतंवाग्निमाजिधर्म्मि - - - - - अग्निंवैश्वानरं विश्वरूपंमे सप्रजाजिधर्मिमुतेनजुहोमि प्रदीप्तंतीक्ष्णीकृतं मित्रथैः किंचमित्रंभजतामनुकूलंप्रथिष्टंपृथुतरंव्याप्तंकर्शमं यरणमुपयामि सोयमग्निः शिशानोज्वालाभिस्तीक्ष्णीभूतःक्रतु भिःकर्मभिरैःपुरुषैःप्रज्वलितःकिंचसोग्निर्नोस्मान्दिवाग्रहनिशं सोहिसकाशेतमः सकाशात्मातरिश्वत्र तृतीयाहेजातवेदः वैश्वानरेश्वरेसमिद्धः समग्रदीप्तः त्रयोदंष्ट्रः लोहशलाकावत्तीक्ष्णदंष्ट्रः सन्यातभानान् अर्चिषाज्वालयाउपस्पशट्टेत्यर्थः किंचतेमूरदेवान्मूलदेवान्रक्षसान्निकृत्याज्वालयारभस्व मारयेत्यर्थः मारयित्वाचकृत्वातेमांसभक्षकान्वैकिस्थितोग्नि र्नआसेपिथत्वंग्राह्यादय

वनमालीटीका ए

भगवत्सङ्गासोचुग्रहनिग्रहप्रकारमाह लेलिह्यसइतिएवंवेगेन प्रविशतोलोकाइत्यायनादीसमग्रान्सर्वान्ग्रसमानोतः प्रवेशय न्ज्वलद्भिर्वदनैःसमंतात्सर्वतस्त्वंलेलिह्यसेआस्वादयसिनेजोभि र्भासिरापूर्यजगत्समग्रं यस्मात्त्वंभासाभिर्जगदापूरयसि तस्मात्त्वं उग्राज्वालोग्राभासोदीप्तयःप्रज्वलतोज्वलनस्यवपनंनिमंतापनं

यंति हे विस्रोसर्वव्यापक ३

रुद्रसमवेनयन्नीटीका. ५

एवंयोहृणोगत्तोभगवन्सवेप्रवेशप्रकारमाहइदानींभगव
नोभगवंद्राशोचतत्रप्रहृतिप्रकारमाह लेलिह्यसइति ज्व
लद्भिःप्रज्ञाज्वल्यमानैर्वदनैःसमंतात्कोणावेशेनसर्वतः सं
ग्रसमानसमस्तान्लोकान्प्रतिवेशेनतन्मुखानिप्रविशता
ईर्षोधनादियोहृजनानग्रसमानोगिलन्समनलेलिह्यसेरु
थिरोतिताकृणाधरादिकंतेपुनःपुनर्लेलिहे विस्रोव्यापन
शीलतेजोभिरापूर्य्यजगत्समग्रंयस्मात्तेजोभिरीदृग्भिरुग्रै
रुजगदापूर्य्यस्थितोसितस्मात्तवोग्राश्चंडोराःभासोदीप्त
यःप्रजवंतिप्रज्वलतोज्वलनस्येवसंतापजनयंति यद्वा हे
विस्रोतवोग्राःप्रतितीव्रादीप्तयस्तेजोभिःस्वकीयैर्मरीचिभि
र्जगदापूर्य्यपरिपूर्णीकृत्यापतंतिस्वयमेवप्रकाशंते २

मधुसूदीटीका. १ योद्धकामानोग्रत्तोभगवन्सवेप्रवे शप्रकारस्तत्तदाभगवतस्तद्राशोचप्रहृतिप्रकार
माह एवंवेगेनप्रविशतोलोकान्सर्वान्समग्रान्समवान्
समंतात्समवान्ग्रसमानःग्रतःप्रवेशयन्ज्वलद्भिर्वदनैः
समंतात्समवर्तनस्तलेलिह्यसेज्वलनस्येवसंतापंतिसतापे
जनयंति हे विस्रोव्यापनशील ३

*आस्वादयसि तेजोभिर्भासि
रापूर्य जगत्समग्रं यस्मात्त
भाभिर्जगदापूरयसि तस्मा
त्तव उग्रातीव्रा भासो दीप्त
यः प्रज्वलतो

सदानंदीटीका. ११

त्वमाणोयुद्धकामानांश्रीमद्भगवतोमुखेप्रवेशप्रकारंदृष्ट्वा
तदाभगवतोहरेः २ तद्राससमग्रहृतेश्चप्रकारंग्रहणेस्वः
आस्वादयसितान्सर्वान्युधिनरवीरान् २ ग्रसमानोनिवे
शेनविशतस्तसमंततः ग्रतःप्रवेशयन्वक्त्रैःप्रज्वलद्भिः र
तस्तवदीप्तयस्तीव्रभा भासःसंतापजनयेसमूः ४ ३

नीलकंठीटीका. १२

येवयंतेतल्लोकेकरुणावानपिनवारयसिप्रसभग्रसितमि
त्युक्तेवेत्याह लेलिह्यमेभूयोभूयोतिशयेनवास्वादयसिको
टिशस्तेसमंतात्ज्वलद्भिर्वदनैर्लोकानसमग्रान्ग्रसमानः
एवंनिर्घृणास्यापिनवतेजानहीयतेप्रत्युतवर्द्धतएवेत्याह
तेजोभिरिति हेविस्रोव्यापनशील समग्रंजगत्तेजोभिरा

*नुमिक्त

सूर्यनवउग्राःसप्तमश्वाभासोदीप्तयःप्रतपंतीतियोज
ना पदार्थःसप्तः ३॰

आनंदटीका सप्तार्थम् ३॰

रामकंठीटीका सप्तार्थम् ३॰

अथनप्तविधंवोरूपंभगवनःशक्तिंदृष्ट्वातत्तत्वजिज्ञासार्थमिदमाह ३॰॥

लासिकी वसंतटीका

किंच ज्वलद्भिर्वदनैःसर्वोलोकान्समंताद्ग्रसमानोभक्षयन् लेलिह्यमिवा
नायासेनतिग्मरश्मि हेविश्वव्यापक नवकालरूपस्त्वदीप्तयः
सहारकारणीभूतास्तेजोभिर्विश्वरंगोः समग्रंजगद्व्याप्योग्रो
वाढ़ःसदाःप्रतपंतिः आध्यात्मिकादितापत्रयपरिणामेनप्रतिः
कूलापयच्छंतीत्यर्थः ३॰॥

पंचोलीटीका

भगवन्त्रेष्टितमाह लेलिह्यसइतिहेविश्वोत्वंज्वलद्भिर्दैदी
प्यमानैःवदनैःसमग्रान्लोकान्समंतात्ग्रसमानःग्रंतःप्र
वेशयंल्लेलिह्यसेआदयन्तासिनवउग्राःक्रूराःभासोदीप्तयः
स्वतेजोभिःसमग्रंजगदाद्यंप्रतपंतिसंतापयंति ३॰॥

रणवीरसमिद्धोथिनी॥

इदानीनद्रुसंतीमूर्तिस्तोपति लेलिह्यसेइति विश्वोत्वमेव
समग्रान्लोकान्समंतात्सर्वावयवतो ज्वलद्भिर्वदनैर्ग्रसमा
नः संल्लेलिह्यसे आस्वादयसि अथच नवोग्रोग्रभासश्च
समग्रंसकलमिदंजगत्स्वतेजोभिरादृर्यप्रतपंति संताप
यंतिचेति ३॰॥

मयभाष्य

॥ ३॰॥

भाषा अनुवाद

और प्रवेश के अनन्तर फेरि क्या होता सो कहतेहैं कि तम भी अति भयानक जिह्वा लहलहाते हुये मानो त्रैलोक्य लील वे को रसना पसारी हैं अपने तेजसे समग्र जगत को सन्तप्त करते भये उन सब वीरों को त्रास करे भक्षण करनेकी इच्छा करतेहो ॥

चौपई

चारनयनसेंगगन अरुणादन मुखप्रदीप्तमें सभलोकदिखा दत तेजहिमें जगदर्णछत्ता तेरे तेजतपावेंछत्ता ३०॥

[illegible]

[illegible]

आख्याहि मे कोभवानुग्ररूपोनमोऽस्तु ते देव
वरप्रसीद विज्ञातुमिच्छामिभवन्तमाद्यं
नहिप्रजानामितवप्रवृत्तिं ११

शाङ्करभाष्यटीका १

यतएवमुग्रस्वभावोऽतः आख्याहीति आख्याहि कथयमे मह्यं
कोभवानेवमुग्ररूपः अतिक्रूराकारोनमोऽस्तु ते तुभ्यं हे देववर
र देवानां प्रधान प्रसीद प्रसादं कुरु विज्ञातुं विशेषेण ज्ञात
मिच्छामिभवन्तमाद्यमादौ भवमाद्यं न हि यस्मात् प्रजानामि न
व तवदीयां प्रवृत्तिं चेष्टां ११

आनन्दगिरिकृतटीका २

भगवद्रूपसाक्ष्यनेन दृष्टपूर्वत्वान्नस्य तस्मिन्नतिस्नासेत्याशङ्क्या
ह यतइति उपदेशे मुमुक्षमाणेनोपदेशकर्तुः प्रह्वीभवने क
र्तव्यमिति सूचयति नमोऽस्त्विति क्रोधत्यागे समर्थयते प्रसादमि
ति त्वमेवमो ज्ञानीषे किमर्थमिदानीमर्थयसे मदीयां चे
ष्टां दृष्ट्वा तयैव प्रतियत्यस्यात्याशङ्कादह न हीति ११

स्वामिकृतटीका ३

यतएवंतस्मात् आख्याहीति भवानुग्ररूपःकश्चमाख्याहि कथय
तुभ्यंनमोऽस्तुहेदेववरप्रसन्नोभव भवेतमाद्यंपुरुषं विशेषेण
ज्ञातमिच्छामि यतस्तवप्रवृत्तिंचेष्टांकिमर्थंमेवप्रश्नंसीतिन
जानामिएवंभूतस्यतवप्रवृत्तिंवार्तामपिनजानामीतिवा ११

निशान्तभाष्यटीका ४

स्पष्टार्थं ११

रामानुजभाष्यटीका ५

आख्याहीति दर्शयात्मानमवयमितिनवेत्यर्थंतिरेकशोसात्मात्
कर्तेप्रार्थितेनभवतानिरंकुशमैश्वर्यंदर्शयतानिरंकुशंरूपमिदमा
विष्कृतेऽतिक्रूररूपः कोभवान्किंकर्तुंप्रवृत्तइतिभवंतंज्ञात
मिच्छामितवाभिमतोप्रवृत्तिंनजानामि यतदाख्याहिमेनमोऽस्तु
तेदेववरप्रसीदनमस्तुसर्वेश्वरएवंकर्तुमशक्तेनाभिप्रायेणोदरं
रूपंरूपमाविष्कृतमितिकाप्रसन्नस्यभवआश्वितवात्सत्यतिरेके

३१

नविश्वैश्वर्यदर्शयतोभगवतोघोररूपाविष्कारेकोभिप्रायइतिपृष्टो भगवान्पार्थसारथिः स्वाभिप्रायमाहपार्थ योगेनविनापिधाने राष्ट्रप्रभुवशेषंराजलोकेनिदर्शनमदमेवंप्रहृत्तइतिज्ञापनायम मेतादृशरूपाविष्कारः नत्वज्ञापनेपार्थप्रयोजयति

अभिनवगुप्तकृतटीका ९

नवप्रहर्षिनवेशिकेनाशयेनेदृशीयमुक्तेतिनदत्रभवतोनरेन गतोविद्याविद्यात्मनः सुहृत्सुहृन्मिश्रसंविद्दत्तग्रासेकरणादभिधी यतइतिप्रायशःसूचितमत्राध्यायेरहस्यउद्दीकितमात्रसंविन्निरम र्थेभ्योस्तकियत्संक्लिष्टेलवनार्थसंदोःस्थितमालम्भेमहि अत्रयद्वः क्रमयाद्दनेषुवनिमित्तेनयशोभवेतिभगवतातत्प्रकृतेप्रागर्ज नेन नचेतहिप्रःकतरदित्यादि ३१

अथभविष्यद्दर्शदर्शनादाह परमार्थप्रदीकाटी० १ यावत्पुनः एकमिति आत्मेतीति ॥

उग्ररूपोभवान्इतिमेआत्माहिकथयस्वनेतभ्यनमोस्तुदेदेवव रप्रसीदभव भवंतमाद्यंपुरुषंविशेषेणज्ञातुमिच्छामि यतोद ष्टेपिरूपेनवप्रहृत्तिंकिमर्थंप्रहृतोसीतिनवेष्टानजानामि ३१

वनमालीटीका ८

अतिभीतःसंभ्रमादाह आत्मेतीतिएवमुग्ररूपोनिष्करुणाकारःकोभ वान् वासुदेवसर्वेश्वरजगद्रक्षणादिकर्तारंचतमेजंसर्वदाजानाम्य मैश्वर्यविशेषस्यविष्णोतोमयाकदाचिदप्यदृष्टत्वमात्माहिकथय ममह्यमसंनतत्रहाय अतएवनमोस्तुतेनभ्यं सर्वगुरवेहेदेववरप्रसी द विज्ञातेविशेषेणज्ञातमिच्छामिभवंतमाद्यंसर्वकारणंहियन्मम वप्रहृत्तिमभिप्रायं नजानामि मयाह्यनेश्वर्यदृष्टप्रार्थितंभवताऽसर्व लोकसंहारकमतितीव्राननंधर्मविशिष्टं प्रकटितमितिभावः ३१

क्रमसंवेजयन्तीटीका ५

दर्शयात्मानमव्ययमित्यादिनाततनविश्वरूपंदृष्टंम यातंप्रार्थितोसि नतमद्योरमिदंदृष्टेनत्वयादेवयाऽनंतत्वऽ त्रैनद्वारणप्रयोजनेचज्ञातमहमिच्छामीत्याह आख्याहीति ईदृशरू पः क्रूराकारोभवान् कोभवनिमम ह्यमनदात्माहिनकथयदे देववर प्रसन्नेनभ्यंसर्वगुरवेनमः प्रणामोस्तुप्रसीदत्योरूपस्या

गेप्रसादंतंकुरुहियस्मात्तवप्रवृत्तिं श्रुत्वेशोजनायप्रवृत्तोस्मी
त्यभिप्रायस्तदकृतोचेष्टोनप्रजानामितवसत्वापिसन्नहेनवेत्थितस्मा
दयंकारणंभवंतंसर्वेश्वरंविज्ञातुंविशेषेणज्ञातमिच्छामिसर्वमेत
त्त्वाख्याहि ३१

यस्मादेवं तस्मात्

मधुसूदनी टीका. १७

एवमुग्ररूपःक्रूराकारःकोभवानित्याख्याहिकथयमेमयमतंना
नुग्राह्यायप्रभवनमात्मनेतुभ्यंसर्वगुरवे देदेववरप्रसीदप्रसा
दंकोर्थात्मगंकुरुविज्ञातुंविशेषेणज्ञातमिच्छामिभवंतमाद्यसर्व
कारणंनहियस्मात्तवस्वरूपमिदंप्रजानामितवप्रवृत्तिंचेष्टां

[illegible]

३१ ॥ ॥ ॥

सनातनी टीका. ११

कोभवानुग्ररूपस्तेमयंकथयसङ्गरो अतएवनमस्तुभ्यमस्तुसर्वे
श्वरायच १ प्रसन्नोभवभक्तायानुग्राह्यायादिदेवतभवंतंज्ञा
तमिच्छामिसर्वेश्वरंविशेषतः २ तवचेष्टांनजानामियस्मात्तव
स्वरूपमिदं ३ ३१

नीलकंठीकादी. १२

एवंदीप्ताकृतीभूतोर्जुनोभगवानयमितिविस्मृत्याह आख्या
हीति एवमुग्ररूपःक्रूराकृतिर्भवान्कोसीत्याख्याहि मह्यंको
सीतिकथय प्रसीदशांतोभव त्वामहंविज्ञातुमिच्छामि यत
स्तवप्रवृत्तिंचेष्टांनजानामि ३१ ॥

श्रीधरीटीका

प्रसीदकूरमाकारंत्यक्त्वाकोभवानुग्ररूपइत्याख्याहि

॥

रामकंठीरीका

इमांस्त्वमग्रेलोकान्त्समंतात्सर्वतोज्वलद्भिर्वदनैस्त्रालेमानैर्ग्रसमा
नः कवलयंल्लिहेसमीलोल्लास्वादयस्यु[illegible]पवनवोग्राभासोचोर
द्रोग्रयः समस्तंविश्वंतेजोभिर्व्याप्यप्रतपंतिदेवरीप्तैस्तेयतएवंपरमप्र
शांतविन्मात्रस्वभावस्यतवचोरंरूपंपश्यामि ततोदेववरस्वोग्रमत
श्चेन्नमःप्रसादंकुरुकोभवानुग्ररूपःसंहृतरतिमत्त्वमाचक्ष्वयस्मान्नवे

वंविधचोरूपग्रहणेप्रवृत्तिंप्रसंवेनजानामितन्ततोनावगच्छाम्य
तआद्यंपरमकारणंभवंतंज्ञातुंविशेषेणेच्छामि[illegible]

लालिकी दसमटीका

यतएवंतस्मात्वंकूराकारःक्रूरस्वाव्यादिकथय तेनभवंतमोक्तुं हे
देववरप्रसीदप्रसन्नोभव आद्यमनादिमोक्षवरंविज्ञातुंविशेषेण
सामान्याकारतयावेदितमिच्छामि यतस्त्वंईश्वरस्त्वंविभासि
क्रौर्यकरोसादात्मिकयासाणाप्रवृत्तिंप्रसरंकिमर्थमेवंप्रवृत्तोसीतिन
प्रजानामि [illegible] ३१ ॥

पंचोलीटीका

यतएवमुग्ररूपत्वेअतःस्वरूपंकथयेत्याह आख्याहीति
हेदेववरेममत्वंआख्याहिउग्ररूपःक्रूराकारोभावान्कःतेनभवंन
मोस्तुप्रसीदभवेतेत्वाआद्यंविज्ञातमिच्छामिहियस्मात्तवप्रव्र
त्तिंवेद्मिनजानामि ३१

श्रीवीरसमिश्रोथिनी

अथपुनरपिप्रार्थनांकरोति आख्याहीति देववरनमोस्तुते
प्रसीदेति प्रथमंभगवंतंप्रसाद्यानेनंप्रार्थनापूर्वकंपृच्छति
उग्ररूपोभवान्कोसीतिमेमत्वमाख्याहि प्रब्रूहीति यतआद्यं
भवंतमादिमादिकारणंविज्ञातमिच्छामीति ननुकिंमांप्रार्थ
यसेस्वयमेवजानीषेइत्याशंक्याह नहीति नवप्रवृत्तिंप्रसरंय
तोनजानाम्यनादित्वादतएवभवंतंपृच्छामीतिभावः ३१॥

मधुभाष्य

३१॥

भाषा अनुवाद

हे महाराज जिससे तुमारा ऐसा उग्ररूप है हमसे आप कोहो सो कहो और हम तुमको प्रणाम करते हैं हे देव श्रेष्ठ तुम मेरे पर प्रसन्न होउ और आदिपुरुष जो तुम सो तुम को मैं जानना चाहता हूं और एवं भूत जो तुम तुमारी प्रवृत्ति करे वार्ता कुछ भी हम नहीं जान शकते हैं ३१

चौपई

कोतुमउग्ररूपमोहिकहहूं मोहिनमोस्तुदेववर इहहूं
तोकों आदि हि जानन चहहों माया तव नहि बूझत अहहों ३१

श्रीभगवानुवाच कालोस्मिलोकक्षयकृत्प्रवृद्धो
लोकान् समाहर्तुमिहप्रवृत्तः ऋतेपि त्वा
नभविष्यन्तिसर्वेयेऽवस्थिताःप्रत्यनीकेषु
योधाः १२ शाङ्कर-भाष्यटीका.

कालोस्मीति कालोस्मि लोकक्षयकृत् लोकानां क्षयं करोतीति लो
कक्षयकृत् प्रवृद्धोवृद्धिं गतोयदर्थंप्रवृत्तस्तच्छ्रुत्वा लोकान् समा
हर्तुं इह अस्मिन् काले प्रवृत्तः ऋतेपि विनापि त्वा त्वां न भविष्य
न्तिभीष्मद्रोण कर्णप्रभृतयः सर्वे येभ्यस्त्वंशङ्कसे येवस्थिताःप्र
त्यनीकेष्वनीकमनीकं प्रति प्रत्यनीकेषु प्रतियोद्धृभूतेषु अनीके
षु योधाएव योद्धारः १२

आनन्दगिरिकृतटीका. २

यदर्थं च स्वप्रवृत्तिः तत्सर्वं भगवानुक्तवानित्याह भगवानिति
कालः क्रियाशक्त्युपहितः परमेश्वरः अस्मिन्निति वर्त्तमानमुद्रो
पलक्षितत्वे कालस्य विवक्षित लोकसंहारेपि तत्प्रवृत्तावपि
नास्मावधंवती प्रतिपत्तारेण भीष्मादीना मत्प्रवृत्ति विनापि सह
तेमशक्यत्वादित्यर्थंकाह ऋतेपीति १२

स्वामिकृतटीका १

एवंप्रार्थितःसन् श्रीभगवानुवाच कालोस्मीति त्रिभिः लोकानांक्ष
यकर्तीप्रवृद्धोनुयःकालोस्मिलोकान्त्राणिनःसहर्तुंइहलोकेप्र
वृत्तोस्मिअतऋतेपित्वारक्षितारंविनापिनभविष्यन्तिनत्रीवि
ष्मतिकेतेमत्प्रत्यनीकेषुअग्रेकान्यनेकानिप्रतिभीष्मद्रोणादीनास्व
वीरसेनासुयेयोद्धारोवस्थिताःतेसर्वेपि १२

विष्णुचित्तभाष्यटीका. ४

अनेनस्ववचनेनकृतानस्मारं श्रीभगवानुवाच कालोस्मीति लो
कानिरूमच्छरीरेसमाहर्तुंपितृकेतेप्रवृत्तःऋतेपित्वाअन्तरेणापि
नभविष्यन्ति १२ रामानुजभाष्यटीका.

श्रीभगवानुवाच कालोस्मीति कलयतिगणयतीतिकालःसर्वेषां

धार्तराष्ट्रप्रभृतयोनोगानलोकानामवसानेगणयन्नंतत्तयंकृद्
द्रोरूपेणप्रवृद्धोगानलोकानूसमाहर्तेमामिमुखेनसंहर्तुमि
प्रवृत्तोस्मि अतोमत्संकल्पादेवतास्तेपिन इदोगाद्तेपिपते
धार्तराष्ट्रप्रभृतयस्त्वत्प्रसन्नीकेषुयेवस्थितायेयाश्चसर्वेनभवि
ष्यंति १२

स्वहार्थे १२ अभिनवगुप्तकृतटीका. ६ ॥

परमार्थप्रकाशटीका. ७

एवंप्रार्थितःसन्भगवानाह कालइति प्रकर्षेणवृद्धोवृद्धिप्रा
प्तोलोकत्रयक्षयकरःकालःसन्लोकान्समाहर्तुमेवप्रवृत्तो
स्मितदेवाद्यैरप्यत्वत्प्रसन्नेकेषु अनीकाप्रतीकानिप्रतिपक्षभूतेषु ये
नासुयेऽवस्थिताःसन्तोवीभूतायेयाःस्वभावतोसर्वेनभविष्यंति
नक्षीविष्यंति तर्हिममगतिःकस्मादुच्यतेत्वंविनानमे
भक्तःप्रणश्यतीत्यतस्तवात् १२

वनमालीटीका. ८

कलयतीतिकालःनत्रकलयनूसंस्थानस्योत्पत्तिलयादेश्चकर्ता
प्रकर्षेणवृद्धःपरिपूर्णःअनादिर्निरीवालोकानांतत्रकृतसंहार
यकर्तापीदानींयुगपद्वृद्ध्यैधनादीनप्रसन्नेणसंहर्तुमिदंप्रवृ
त्तः उग्ररूपःकिमर्थमितिप्रश्नपरिहारायेयंकालोकलयकृदित्यक्त
यादयोऽस्तेपीति अपिपदात् नेभाजादीनपिविनेत्यर्थः अन्यद्
शास्त्रोहिणीरूपेषुप्रत्यनीकेषुप्रतिपक्षभूतेषुनीकेषुसैन्येषुयेवस्थि
तानेसर्वेपिनभविष्यंति. नस्यास्यंतिकिंतमरिष्यंतीत्यर्थः १२

रुक्मवेजयंतीटीका. ९

एवमर्जुनेनदृष्टःपार्थसारथिर्भगवान्स्वरूपंतद्दर्शनप्रयोजनंचाह
त्रिभिःकालोस्मीति यस्मात्प्रलयवत्त्वेवउभेभवत आदने सत्सर्ग
स्योपसंवनकरणावेदयत्रसरणादिभ्रुतिप्रतिपादितोयःकालः क
लयतिसर्वेषांउर्णोयनादिभूभुजामवसानेगणयतीतितथास
ग्रहमस्मि ग्रहभवामिलोकत्रयकृत लोकानांवत्सादिस्थावरान्ता
नांसर्वेषांजनानांतत्तथावनिवृत्तयक्षहिनाशकरःप्रवृद्धः अधुना
तिघोररूपेणहिंसात्मकःसर्वेषामेवग्रासःकालइत्यादिपदत्रयेणकाभ
वानुग्ररूपस्तस्यैवस्वरूपमिदानीं तवप्रवृत्तिनजानामीत्यस्यात्त

न्नरमाहलोकानिति इहास्मिन्कुरुक्षेत्रेसमवेतान्लोकान्दुर्योधनादीन्स
माहर्तेसम्यगाहर्तेभवितुंप्रहृष्योहमस्मिपूर्वमेवानिष्टोरणाकारदर्श
नादतिभयमुत्क्रंपनःसर्वेलोकान्भक्षयामीतिनउक्तिश्रवोरणनस्वरूपा
पिनाशेमानयंतेषुकवदनमर्जुनमवलोकयतोविहायेतरान्सर्वा
नभक्षयामीमाहरूतेपित्वामितिवोसत्वायेभक्षयिशद्येनयुधि
ष्ठिरादीन्रूतेविनाप्रमनीकेषुप्रमनीकोपलक्षितत्वयत्तप्रतिपक्ष
सेनेषुस्थितेनसहास्मदीयेरपियोधमुख्यैरित्यर्जुनोक्तिरूतेपित्वा
मितिभगवदुक्तिश्रवणगोचरस्थिताःपुरुषकरणार्थंसंमुखमानाः
स्थिताःयेयोधायोद्धारस्तेसर्वेमयाहतास्तेदवनभविष्यंतिसर्वान्व
धभक्षामीत्यर्थः यद्यानुयुयुत्सवःपुरुषकरिष्यामितर्हिवधमेतान्व
धिष्यसितोचेत्कथमित्यपेक्षायामाहरूतेणीतिवोयोद्धारंरूतेपित्वा
वोरूतेवधोगाटतेपिविनापिमत्संकल्पादेवैतेसर्वेनभविष्यंति
मरिष्यंतेवेत्यर्थः ३२

+ श्रीभगवानुवाच

मधुसूदनटीका॰ ९

कालःक्रियाशक्त्युपबृंहितःसर्वस्यसंहर्तापरमेश्वरोस्मिभवामि इहा
नीप्रवृद्धोहद्विगतःयदर्थंप्रवृत्तस्तल्लक्षणेलोकान्दुर्योधनादीन्स
माहर्तेसम्यगाहर्तेभक्षयितुंविनाकथमेवंस्थास्यतीतिचेत् नेत्याहरू
तेपित्वामर्जुनेनयोद्धारंविनापित्वद्व्यापारंविनापिमद्व्यापारेणैवनभवि
ष्यंतिविनश्यंत्येवसर्वेभीष्मद्रोणकर्णप्रभृतयः योद्धृमनर्हत्वेनप्रभा
विताः अन्येपियेवस्थितांप्रमनीकेषुप्रतिपक्षसैन्येषुयोधाःयोद्धारः
सर्वेपिमद्व्यापारेणैवनभविष्यंतिनत्वनवद्व्यापारोःकिंचित्करइ
त्यर्थः ३२

सदानंदटीका॰ ९

एवंसंप्रार्थितोविस्मितोस्मनानाप्रियेणप्रभुःस्वैरंयथेष्टंयदर्थाच्चप्रहृत्ति
स्तन्निमित्तंवदन् १ उवाचपरमेश्वर्यनिधिःश्रीभगवानिति कालोहंसर्वे
संहर्तातिक्रियाशक्त्युपबृंहितः सर्वेश्वरोभवामीहदानीप्रवृद्धिंगतःपरं
लोकान्दुर्योधनादीन्सर्वान्मत्तपितेत्वद्व प्रवृत्तोस्मिजगत्कर्तापाता
संहारकृद्भिः मत्प्रवृत्तिंविनासैवंकथंस्थास्यतीतिचेद्भवान्मामर्जुनं
विनाशूरंतद्व्यापारंविनापिनेमद्व्यापारेणशुद्धेनभीष्मद्रोणादयो
विनाः ५ विनंसेतमनेयत्तालोकेसेभाविनाश्रपि येवाप्यवस्थि
नाश्चेप्रतिपक्षसैन्येषुभोः योद्धारस्तेमयासर्वेहतत्वादेवमीतेनो
व्यापारस्तवतत्रस्यादकिंचित्करएवहि ३२

+ एवमर्जुनेनप्रार्थितःयःस्व
यंयदर्थंचावतरप्रहृत्तिःतत्त
द्वैनिमित्तः॥

^ प्रवृत्तोहमिहास्मिन्का
ले मत्प्रवृत्तिं

^ नु

^ यि

^ ता

^ तथा

एवमर्जुनेनप्रार्थितोभगवानुवाच कालस्मृति इहास्मिन्संग्रामेलो
कान्समाहर्तुमिहप्रवृत्तःप्रवृद्धोमहान्लोकत्रयकृत्कालोना
मपरमेश्वरोस्मि यस्मादेवंतस्मात्त्वदेतेपिनावांविनापिसर्वेन भ
विष्यंतिमरिष्यंतिकेनसर्वे येप्रत्यनीकेषुशत्रुसैन्येषुयोधाःशूराःभी
ष्मादयोऽवस्थिताःसंति ३२

एवंप्रार्थितःस्वस्वरूपंप्रवृत्तिंच श्रीभग श्रीनीलकंठीटीका
वानुवाच॥ पृथिवीभारभूतान्लोकान्संहर्तुंप्रवृत्तःसंहारकर्तृकालस्वरूपोस्मीत्य
र्थः मत्तेपिनाशंतिनयद्यपिपलान्नाशयांहंतुनेच्छामितथापिमयैतेहता
एवेत्यर्जुनप्रोत्साहनार्थम् यद्वाजयेमयरिवानोजयेकरिंतिप्राणदि
ष्टंशोषयमयाकरोति ३२

केनहेतुनाकालत्वमेवंविधंचोरूपंदृ रामकंठीटीका
ष्ट्वाह॥ किंमाविष्करोतीतिविज्ञानोभगवा
नुवाच॥ कालोस्मिनिरुपत्नवस्वरूपाप्रकृतमेवविजृंभमाणाशेषोग्रचोरूप
ममग्रशक्तेः कालाख्याचोरामेयंशक्तिरित्यर्थः शक्तेश्चशक्तिमदभे
दादहमेवकालइत्युक्तं कीदृशःकालः सकललोकसंहारैकव्या
पकोधनातिरूपेणिवाप्रवृद्धान्सर्वान्लोकान्संहर्तुंप्रवृत्तोस्मीत्यर्थः
तस्मात्संहर्तृत्वेनेतेप्रवृत्तः प्रस्तुतत्वात्त्वदेतेपिनावांविनापिपरि
हरणंपापात्मकत्वात्सर्वथैवनभविष्यंतिनयुद्धोत्सवानेपिविनंक्ष्यं
ति केनेयोधाःसंप्रहारिणाः प्रत्यनीकेषुप्रतिपक्षसैन्येष्वेस्थिताय
एवमेतेसंस्रवंत्येवावश्यंभावविनाशेनावस्थिताः ३२

यत्तोनूंश्रीभगवानुवा लक्ष्मिकी वरदनीटीका
च लोकत्रयकर्तायःकालःसएवास्मिप्रवृद्धोवृद्धिंगतः किमर्थंप्रवृत्तो
सीत्यत्रोत्तरमाह लोकान्त्रयाणांनःसंहर्तुमिहलोकेप्रवृत्तोस्मि प्रवृत्ता
स्तेपित्वांहत्वानैवंविनापि त्वयायोत्स्यमानेपीत्यर्थः एतेसर्वेनभविष्य
न्तिविनंक्ष्यंति सर्वेषांप्राणिनांविनाशाशंकापरिहारार्थमाह येयोधा
प्रत्यनीकेषुसर्वेषुसैन्येष्वस्थिताःसंतएवनंक्ष्यंति

३२॥

पंचोलीटीका

एवंप्रार्थितः सन्श्रीभगवानुवाच कालोस्मीतिलोकक्षयकृत्प्रवृ
द्धः कालोहमस्मिप्रहृद्धः प्रवृद्धिंप्राप्तः लोकान्समाहर्तुंस
हर्तुमिहप्रवृत्तः इदानीमस्मिन्कालेमंप्रवृत्तयः येप्रत्यनीकेष्वनीकमनीकंप्रति
योधाः योद्धारः अवस्थिताः तेसर्वेभीष्मद्रोणप्रभृतयः येभ्यस्त्वंशं
कृतेसर्वेत्वांऋतेविनानभविष्यंति ३२

श्रीवीरराघवयोगिनौ॥

इत्यमेवप्रार्थितोभगवान्नर्जुनंप्रत्यनुनिदृक्षुरुवाच कोलास्मीति
प्रहृतकालःकालक्रियाशक्तिमाल्लोकक्षयकृल्लोकानांक्षयं
करोतीतिलोकक्षयकृल्लोकसंहारकः प्रहृद्धःसमृद्धतेजाइदा
स्मिल्लोकेलोकान्समाहर्तुंप्रवृत्तोस्मि इतितथादृश्येयोधाः प्रत्य
नीकेषुपक्षसेनास्ववस्थिताः समुद्यतेस्थितास्तेसर्वेत्वयुद्येतास्तेपि
त्वय्यसत्यमानेपिनभविष्यंति भावितांनगच्छत्यथात्वयमेवन
घ्नंतीति ३२॥

मधुभाष्य

कालपदोजगद्ग्रंथनच्छेदनज्ञानादिसर्वभगवद्धर्मवाची कल
ग्रंथने कलच्छेदने कलज्ञाने कलकामयेनुदितिपठंति प्र
सिद्धश्चसपदोभगवति नियंतेकालपदोनवहंत्राकृविवस्व
से अयपुरुषः प्रयामोलोकस्यहरतिप्रजाः बध्नातिरक्षतिमोदो
दुःपस्नरघानयायेतिमोक्षधर्मे विस्तरोबहोबलिर्वक्ति
विस्तोचाधीस्वरेतिनंधारयत्कालविग्रहे इतिभागवते प्रहृद्धः
परिपूर्णादिर्वा स्तेचसत्येवाभीहादिनिष्पत्तिः एतन्मद्
हूतमनंतमितिच प्रविस्तरस्तवमस्तवीयोवेषंधस्यस्यवि
स्तेनामेतिच नवबर्हनं नासोऽनानाननमविष्यति नेथनेसो
इतिहिभागवते यस्यदिव्यदिनरूपं हीयतेवर्हनेनचेतिमोक्षधर्मे
नकर्मणेतिनकर्मणापिनकिंचयमिति लोकान्समाहर्तुमिह
विप्रोषणप्रहृतः भागवीस्वनेत्यपिप्रहृः प्रत्यनीकंपरस्य

नया सर्वेपिनभविष्यंति अतो दिग्पादिभेदेनबहुवचनंयुक्तं
योसपिरक्षित्रभूमोपानयतिनक्षिरोभेत्स्यतीतिनप्रियुक्तं
जयद्योपि विशेषलोकः सवराकसवीक्षक्रियतिकर्मः य
देनहव्यमागंनत्यानेयुक्तमेवेत्यर्थः ३२।

भाषा अनुवाद

इस प्रकार अर्जुन से प्रार्थना किये गये श्रीभगवान तीनि श्लो
कसे कहते हैं कि मैं सकल लोक का लय करनेवाला काल रू
पहौं और प्राणियों को संहार करने की इच्छा करि इस लोकमे
प्रवृत्तभया हौं सो एक तुमको छोड़ि और कोई हूम से नबचैगे
अर्थात् प्रति सेना मे जो भीष्म द्रोण आदि योद्धा हैं वे सबमरैं
गे ३२

चौपई

द्रोंकाल प्रवृद्धलोकक्षयकारी दरहूं लोक३हतगप्रवतारी"
बिनातोहिनहिकोईबचैहैं योधयोधे प्रतिसेनरचे हैं ३३॥

104

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व
राज्यं समृद्धं मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥३३

रामानुजभाष्यटीका ।

यस्मादेवं तस्मात्त्वमिति तस्मात्त्वमुत्तिष्ठ भीष्मद्रोणप्रभृतयोऽति
रथाश्चत्वारोदेवैरप्यजेयेन जिताइति यशोलभस्वकेवलं पृथि
व्यां तत्प्राप्यते जित्वा शत्रून् दुर्योधनप्रभृतीन् भुङ्क्ष्व राज्यं सम
द्धं अप्रतिपक्षमकण्टकं मया एवैते निहताः निश्चयेन हताः प्राणो
द्वियोजिताः पूर्वमेव निमित्तमात्रं भव त्वं हे सव्यसाचिन् सव्येन
वामेन हस्तेन शरान् क्षेपात् सव्यसाचीत्युच्यते ऽर्जुनः ॥३३

आनन्दगिरिकृतटीका ।२

नन्वीदासीन्येपि प्रतिकूलानीकस्यामत्यात्तिकूत्सादेव न भविष्य
तीत्येवं यस्मात्निश्चिते तस्मात्त्वेदासीन्यमकिञ्चित्करमित्याह
यस्मादिति उत्तिष्ठ युद्धाय उत्साहीभवेत्यर्थः यशोलाभमभिभुङ्
क्ष्वेति भीष्मादिकं तेनाप्यसमर्थं तेनास्माकं किं प्रयोजनमित्याशङ्क्याह पृथिव्यामिति राज्यभोगेऽ
स्माकं किमनयेत्तितेनेत्याशङ्क्याह जित्वेति भीष्मादिष्वतिरथेषु कु
तोजयाशङ्का इत्याशङ्क्याह मयैवेत इति नहि मृतमारणार्थो न
मे प्रयत्नोस्तीत्याह निमित्तेति सव्यसाचिपदं विभजते वामेनेति ॥३३

स्वामिकृतटीका ।३

यस्मादेवं तस्मादिति तस्मात्त्वं युद्धायोत्तिष्ठदेवैरपिदुर्जेयाभीष्म
द्रोणादयोमयैवनिर्जिताइवेत्यवेहि तेयशोलभस्वप्राप्नुहि अयत्ने
नशत्रूनिजित्वासमृद्धंराज्यंभुङ्क्ष्वपतेतवशत्रवस्तीव्रयुद्धात्पूर्वमे
वमयैवकालात्मनानिहितप्रायाःनशापित्वंनिमित्तमात्रंभव हस
व्यसाचिन्सव्येनवामहस्तेनसाधितेसंधातेशीलमस्यनिपुणसा
वामेनापिबाणक्षेपात्सव्यसाचीत्युच्यते ॥३३

पिशाचभाष्यटीका ।४

स्पष्टार्थं ॥३३

105

रामानुजभाष्यटीका. ५

तस्मादिति तस्मात्त्वेतानुपरिष्ठाद्योनिष्टानछ्रून्निहत्य शेषलभस्वधर्मंचराज्यसमृद्धंभुक्ष्व मयैवैतेहतास्त्वंनिमित्तमात्रंभवसव्यसाचिन्मयाहतान्द्रोणंचभीष्मंचजयद्रथंचतथान्यानपियोधवीरान्जहिमाव्यथिष्ठायुध्यस्वजेतासिरणेसपत्नान्

अभिनवगुप्तटीका-६

स्पष्टार्थं ३३

परमार्थप्रपा-टीका.७

अतएवाह तस्मादिति तस्मात्कारणात्त्वंयुद्धायउत्तिष्ठकिंतत्फलं देवैरपिदुर्जयाभीष्मादयोःजेतेनानिर्जिताइति यशोलभस्वतः शत्रून्निहत्यसमृद्धंदेशबलकोशदुर्गयुक्तंराज्यंभुक्ष्व अथशब्दोनियोजयैवमेवोद्दिश्यहतानामपिपरमेश्वरस्यैवनीमारायोन्दहेः तथाहि श्रीहोईत्वामिहिहतामहाएसातोवाजास्मत्कारावाः तवाहोवोवाहताअपिषुवाइहासामतिमोगाः लोकाहायेजोवास्तु प्रवातोः उपरुषाउवाहोदस्तु अत्रतु श्रीहोईतिचसंबुद्धोविकल्पहा उगयतरंति उहग्रेणोक्तः तथाश्रीर्हीर्हीर्वैवाकुर्यादिनिसामशि लास्तुगानक्रमेदर्शितः अथसहितापाठस्तु त्वामिहिहतामहेसा तोवाजस्मत्कारवः त्वाहत्रैष्टुभसमतिनरेलाकाष्टास्वर्वतइति भा ष्ये भोईइहपरमात्मनवयंनरामनुष्याःकारवस्तोतारोवाजस्यव लस्यसातौलाभेकोत्तमाणेत्वामित्वामेवहतामहेआहूयामश्रा कारयामइत्यर्थः तथाहत्रैष्टुभावरकेषुरणस्थितेषुसत्सुत्वामेवा हूयामः तथाश्रुतेःसेयंसमस्तकाष्ठासमर्यादासमूहश्चनया धर्मयुद्धसुत्वामेवसमनिभल्कुप्तपातिनेप्रभुंआहूयामाम मित्यर्थः आपस्तंभशाखायांचरुणाहवेनमतनानयामित्रेष्टुभे नछंदसापेचदशनलोमनहरुनासम्नावषट्कारेणवज्रेणसह जानिनि भाष्ये रुद्रेणपरमात्मनादेवेनहतानाष्टतनाःशत्रुसेनाः जयामितत्रानुष्टानमहतासाम्नानुगासनया किंभूतेन रुद्रे भेनचतस्मात्रिषादस्तेरणछंदसानयापेचदशनलोमन त्रैलो

णेच पेचभ्योर्ङिकरोतिसन्तिसूभिः सपक्षयेति अयमर्थः एकस्मि
क्ते त्रिगवर्त्तनीयेतत्रप्रथमाहतौप्रथमयाऋचस्त्रिरभ्यासः द्वि
तीयाहतौमध्यमायात्तृतीयाहतौउत्तमायाः सोयंपंचदशमन्त्रो
मन्त्रेनएवमनयोपासनयाषड्रकोवशीभूयशत्रून्हिन
क्ति अस्यैतत्शत्रुवधसहजास्त्रनिरूपणेः सायणभाष्यकारैरपि
दैविकाभिप्रायेणवाद्यसंग्रामविषयोदर्शितः सावणभाष्यत्व
आत्मरीत्याभ्यंतरसंग्रामविषयोदर्शितः द्वादशाक्षेत्वभयम
पि अत्रार्थेऋक्शाखि याश्रुतिरपि संस्कृत्यनुभयंसमाक्रु
तमस्मदन्तेवकृणुस्वमकः भियंदधानाहृदयेषुशत्रवः परा
जितासोमत्रयनिलयेतो भाषे अस्मभ्यमस्मदर्थंपरमेश्वरेण स
माकृतेषुप्रायोग्यमुभयंधनंसंस्कृत्यसम्यक्प्रकारेणनिर्मिते
त्यैश्वाग्निकमाधिदैविंच तथोदातारोहो त्रैश्वाग्निकस्यदातावरु
णःप्रकाशकःपरमात्मा अस्मस्मन्नरिक्षेहृदस्तिरिनिश्रुते
रिंद्रःपेश्वर्यवान्देवतारूपइंद्रः अथाभयधनस्यफलमाह
भियमिति येनधनेनहृदयेषुप्राणिनामेतःकरणेषुशत्रवः
षड्रसपत्नाः भियंदधानाः सतोः यनिलयेतोनाशंप्राप्नुवंतीत्य
ध्यात्मपक्षेत्रपरत्रहृदयेषुस्रोतःकरणेषुभयंदधानाः स
तोःस्वतएव युद्धेविनापि त्रयनिलयेतोनाशमायांतिति त्रय
प्रकृतमन्त्रसप्तमपदेशत्रुपराजयेनत्रयाणांनास्तिकृतःपते
पूर्वमयेवनिरस्ताःसंतीतिनिलयेवदृष्ट अतःपरंभोसख्यमाविन्
अर्जनेतेनिमित्तमात्रंभव अत्रेतइंद्रंभवति पूर्वमहंरुद्रेति
मित्तमात्रंकृतास्वनिर्मितेधनुषिकल्पांतकालानलसमः सन्ये
वाणोभूत्वाऽर्जयमपिविरमधात्तेसंप्रतिनोनिमित्तमात्रक
त्वायतोजगस्संहृतिप्रलयसमर्थसंकल्पानामस्माकंकुरुक्षे
त्रदलनेकियानायासोस्तीत्यर्थश्रुतिरपि अहंरुद्रायधनुरात
नोमित्रबलहिंसायतेहंतवाउ भाषे अहंरुद्रायमहादेवार्थंमे
हत्तमलौकिकंधनुरातनोमिविस्तारयामि किमुस्तिष्प त्रल
हिंसेत्रबलेहृष्टारंशत्रुंत्रिपुरदैत्यंहंतेनाशयितेतऽर्कंरथःसो
णीयतेत्यादि ११

भीष्मद्रोणादयोयेयोद्धुमर्हन्तेनतयोत्कालेमयैवनिहतास्त्वंवि
व्यापारंमात्रकार्षीरित्याह तस्मादितियस्मात्त्वयापारंविनाप्येतेविनश्य
न्त्येवतस्मात्तन्निष्ठ उद्युक्तोभवयुद्धायदेवैरपिदुर्जयाभीष्मद्रो
णादयोनिरस्ताकटिमेवाज्ञानेननिर्जिताइवेवभूतंयशोलभस्व
मरद्विःपूर्णेपेवद्रियशोलभ्यते अयत्नेनस्त्रिताशत्रूनइर्योध
नादीन्भुंक्ष्वसमृद्धंनिःकंठकंराज्यंपूर्णेवशत्रोमयैवकालात्मना
निहताःसंहतास्तावपुषःतदीयपुद्धास्त्रवेमेवकेवलंतवशोला ५
भायरथात्मागेवंनिमित्तमात्रंभवनेनेतेनि
र्जिताइतिसार्वलोकिकव्यपदेशास्पदंभवदेसव्यसाचिन्मेव
नवामेनइत्येतापिशानसचित्तेसंधातेशीलंयस्यतत्तादृशस्य
तवभीष्मद्रोणादिजेयानामभावितत्वस्मात्त्वंव्यापारंनैवरमया
रथात्मनमानेषेतेषतवैवकर्तृत्वंलोकाःकल्पयिष्यंतीत्यभिः
प्रायः ३३

ऋसमवैजयन्तीटीका. ५

तस्मादिति यस्मात्त्वव्यापारंविनैवमत्संकल्पादेवैतेविनङ्क्ष्यंत्ये
वतस्माद्धेतोःदृसव्यसाचिन्मेवनवामेनइत्येतापिशानसचित्ते
संधातेशीलंयस्यतत्संबोधनेदृसव्यसाचित्त युद्धनिर्भरप्रमेहत्व
इत्येतापियोद्धुंसमर्थंसर्थःमत्सहायेनत्रैलोक्यविजयसमर्थत्वसु
निष्टस्वधर्मभूतायपुद्धायोद्युक्तोभवयशोलभस्वसमरेःमरज
यशालिनोदेवव्रतगुरुकृपीशल्यादयोजनेनानायासेनैवनि
र्जिताइतिनिश्चलांकीर्तिंवप्राप्तुहिशत्रून्इर्योधनादीन्नि
र्जित्यसमृद्धंधनरत्नादिसम्पन्नंनिष्कण्टकंराज्यंभुंक्ष्वस्व
कीयेनभोगपनोप्रापयनत्वंनिप्रवलप्रतापानभीष्मद्रोणादी
नहंकर्णविजेष्यामीतिचेन्नाहमर्जुनेतेनिमयात्राश्रितइःखा
मर्हिस नास्यभक्तविरोधिहन्तास्वजनरक्षणावहकत्वेरोगवदूर्व
मेवकृष्णस्मरद्रणकालेपवैतेकृतापराधाभीष्मादयोनिहता
वधिताःकेवलंमयैवशोलाभायेवरथात्मादिग्रहनेभ्योनपानिता
इत्यर्थःननुपूर्वंयदेतेतयैवनिहताःसुस्तर्हिमांयुद्धायकिम
र्थंप्रेरयसीतिचेन्नाहनिमित्तमात्रंभवममशस्त्रादिस्थानीयोभ
व यद्वामयादृग्ममानानामेषांसत्यानिमित्तमात्रंकर्तृत्वंगुण

मधुसूदनटीका १०

यस्मादेवं तस्मात्त्वमंतरेणापियस्मादेवैर्विनेतेनेवतस्मात्त्वमुत्तिष्ठ
उपुक्तोभवयुद्धायदेवैरपिदुर्जयाभीष्मद्रोणादयःप्रतिरथाः
कटितेवार्जुनेननिहताइतेवेभूतेयशोलभस्वमहद्धिः पुत्रे
त्वहियशोलभतेस्मयत्नान्नजिताशत्रूनइर्योधनादीन्भुक्त
क्षोपसर्जनंतेनभोगपतोप्रापयसमृद्धंराज्यमकंटकं पतेचत
वशत्वेमयैवकालात्तनानिहता संख्यनापुषः त्वदीयपुद्धात्
पूर्वमेवकेवलंतवयशोलाभायरथान्नपातिताः अतस्त्वंनिमि
तमात्रंभवसव्यसाचिन् सव्येनवामेनहस्तेनापिशरान्संधि संधा
तुंशीलेयस्यतादृशस्तवभीष्मद्रोणविजयोनासंभावितः
तस्मात्त्वंद्रोणादीनेतरंमयारथान्मानेष्वेतेषुतत्वेवकृत्
वंलोकाःकथयिष्यंतीत्यभिप्रायः ननुद्रोणोब्राह्मणो नमो
धनुर्वेदाचार्योमममगुरुर्विशेषेणवदिव्यास्त्रसंपन्नः तथाभी
ष्मःस्वछंदमृत्युर्दिव्यास्त्रसंपन्नश्चपरशुरामेणेहयुद्धयुपा
गम्यापिनपराजितः [illegible] तथायस्यपितामहस्तत्रः
तपश्चरतिममपुत्रस्यशिरोयाभूमौपतनिष्यति तस्मापिशि
रस्तत्कालभूमौपतिष्यतीति सत्यद्रथोपिनेतमशकः स्व
यमपिमहादेवाराधनपरोदिव्यास्त्रसंपन्नश्चतथाकर्णोपिह
येसूर्यसमस्तदाराधनेनदिव्यास्त्रसंपन्नोवासवदत्तयाचैकघ्न
घंत्रातिम्याकर्तेमशक्तयाशक्त्याविनिर्मुक्तः तथाकृष्णभूरि
मभूरिश्रवः प्रभृतयोपिमहानुभावैःसर्वैरजेयाएवतेष
मस्मत्कथैर्जिताशत्रूनराज्येभोक्ष्यसेकथंवायशोलभस्वेतिशंका
मर्जुनस्यापनेतुमाह तदाशंकाविषयान्नामभिःकथयन् ११

सदानंदटीका ११

तस्मात्पारेविनापेतेमयैवनिहतायतः तस्मात्तेभवयुद्धायस
मुपुक्तोत्रकेवले १ भीष्मादयोमहाशूराश्चेयाश्चमरैरपिअ
र्जुनेननिताइत्येलभस्वेतियशोमले जिताशत्रूनायासाङ्गेत्व

राज्यमकंटकं मयैवैतेहताःपूर्वंनिमित्तंकेवलंभव १ स्थान. पातिनाप्तेनयशोलाभाएकंवलं शरत्वामेनसंधातेशीलेय. स्मतेवेतिसः ४ तद्यापारात्तेहतस्मान्मयैवैतेषुनहत्थान् पाप मानेषुकर्तृत्वेकल्पयिष्यतितेनत्वं ५ ३३

नीलकंठीटीका ५२

तस्मादिति यस्मात्त्वोविनाप्येतेमरिष्यंतितस्मात्तेउत्तिष्ठयुद्धाय शेषस्पष्टं ३३

ग्रानंदटीका स्पष्टार्थम् ३३

रामकंदीटीका

कालात्मिकयासव्यसाचिन्नग्रेवधस्यानेतानिमित्तमात्रंभ व पद्यमतित्यक्तार्थपदेषश्लोकः

[illegible]

लासिकी [illegible]टीका

नचैतद्भियाहतिप्रश्नस्योत्तरंभाविकल्पाणरूपमाह ॥

यतएवतस्मात्त्वमुत्तिष्ठ उत्तीर्यात्रोभीष्मादीनजयेनयशोल भस्व एवमप्रयासेनशत्रूंजित्वासमृद्धंराज्यंभुंक्ष्व एतेनवशा वोमयैवकालात्मनापूर्वमेवतद्व्यापाराद्धतास्तेत्वंनिमित्तमा यांहेसव्यसाचिन् सव्येनवामहस्तेनापिसाचित्तेभव

३३ ॥

पंचोलीटीका

यस्मादेवंतस्मात्त्वमुत्तिष्ठभीष्मप्रभृतयोत्रतिरथाःदैवैः रक्षजे यास्तेउर्जुनेनजिताइतियशोलभस्वकेवलंपरेहिनप्राप्यते श त्रूनद्रोणप्रभृतीनजित्वासमृद्धंराज्यंभुंक्ष्वएतेमयैवपूर्वो भीष्मश्लोकर्णइतिदर्शयतिनिहताःप्राणैःवियोजिताः हेस व्यसाचिन्तेनिमित्तमात्रंभववामेनपाणिनाशरासणंहेयान्स व्यसाचीसव्यतेउर्जुनः ३३ ॥

प्राणान्संधानुशी मस्पेति हे अर्जु निमित्तमात्रं

तस्मादिति यस्मादेवं तस्मात्तदज्ञयातमुक्तिश्रेयुक्तोभव तत्
पक्षस्वधर्मीचरणाक्रूरंजित्वायशोलभस्वसम्रद्धंराज्यंहत्वामित्रंक
टकंराज्यंचभुंक्ष्वेति अथकथमहमेतान्निहन्मीतिचेत्तत्राह मयै
वेति यतेषामयंवोमयैवपूर्वमेवनिहताभवंति ततवत्ताक्रूरंप्र
यासः त्वंतत्सव्यसाचिन् निमित्तमात्रंभवेतित्वान्निमित्तीकृत्यस्व
यमेवाहंत्वाक्रूरस्मिति कांतेविनभ्रांतिरितिभावः ३३॥

मधुभाष्य

३३॥

भाषा अनुवाद

जिस हेतु ऐसा होनहार है इस से तुम युद्ध के अर्थ उठो और
देवतों से भी अजय जो भीष्म द्रोण आदि वीर सो अर्जुन से परा
जित भये इस यश को लाभ करो और शत्रुवों का विनाश क
रि कै समृद्ध राज्य भोग करो और ये जो तुमारे शत्रु तिन को
युद्धके पूर्व ही कालरूप मैंने यद्यपि हत करि राखा है तोभी
हे सव्यसाचिन् अर्जुन तुम निमित्त मात्र होउ सव्यसाची उसको
कहते जो दोये हाथ से युद्धादि कार्य करि शके ११

चौपई

मैं प्रसन्न होय यह अर्जुन तोहि रूप दिखायो स्वयोग तें सोहि
तेजोमय विश्व अनंत सु आदि पूर्व न दृष्ट भो तें और न दादि ४७ ॥

15

नवेदयज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्न
नोभिरुग्रैः एवंरूपःशक्य अहंनृलो
के द्रष्टुं त्वदन्येन कुरुप्रवीर ४८

शाङ्करभाष्यटीका १

आत्मनोमम रूपदर्शनेन कृतार्थं एव त्वं संवृत्तइति ततः
श्लोकेन वेदेति न वेदयज्ञाध्ययनैर्न दानैश्चतेषामपि वेदा
नामध्ययनैर्यावत्यज्ञाध्ययने च वेदाध्ययनैरेव यज्ञाध्य
यनस्य सिद्धत्वात् पृथक्यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपल
क्षणार्थं तथा न दानैः तुलापुरुषादिभिर्नैव क्रियाभिरग्निहो
त्रादिभिः श्रौतादिभिर्नापि तपोभिरुग्रैश्चान्द्रायणादिभिरुग्रैः
घोरैः एवं रूपोयथा दर्शितं विश्वरूपं यस्य सोहमेवं रूपः
शक्योनशक्यः अहं नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन कुरुप्र
वीर ४८

आनन्दगिरिटीका २

नच्छन्देन प्रकृते दर्शने परामृश्यते वेदाध्ययनात् पृथक्
यज्ञाध्ययन ग्रहणं उनरुक्तेरयुक्तमित्याशङ्क्याह न वेदेति
न च वेदाध्ययन ग्रहणादेव यज्ञविज्ञानमपि गृहीतमध्य
यनस्यार्थावबोधानत्वादिति वाच्यं तस्यात्र ग्रहणान्नत
या द्रष्टुः साधनत्वादिति भावः श्लोकपूरणार्थंमसहितक
रणं त्वत्तोन्य न मदनुग्रहविहीनेनेति शेषः ४८

स्वामिकृतटीकादी २

एतद्दर्शनमतिदुर्लभं त्वद्भक्तेरेकलभ्योसीत्याह नवेदेति वे
दाध्ययनातिरेकेणयज्ञाध्ययनस्याभावात् यज्ञपदेनयज्ञवि
ज्ञानंकृत्स्नकर्मज्ञानात्तेन वेदानांयज्ञविज्ञानोवाध्ययेनेति म
त्प्रीतिः नवदानैर्नचक्रियाभिरग्निहोत्रादिभिर्नवोग्रैस्तपोभिश्चा
न्द्रायणादिभिः एवंरूपोहंत्वत्तोमेनमनुष्यलोके द्रष्टुंशक्यः अ
पित्वनन्यभक्तेनैवमत्प्रसादेनदृष्टुंकृतार्थोसीति ४८

पिशाचभाष्यटीका ४

नवेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ॥ ४८

रामानुजभाष्यटीका. ५

अनन्यभक्तिव्यतिरिक्तैः सर्वैरप्युपायैर्यथावदवस्थितोऽहमर्जुन इष्टो नशक्य इत्याह नवेदेति एवंभूतोऽहं यथावस्थितोऽहमपि भक्तिमन्तरेणैकान्तभक्तिरहितेनकेनापि पुरुषेणैकेवलवेदयज्ञादिभिरिष्टुं नशक्यः ४८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ४८

परमार्थप्रपाटीका. ७

अत्रास्यैवंभूतमाह नवेदेरिति वेदाङ्गादयः पञ्चाग्नयस्त्रयो यादयः अध्ययनशास्त्रपठनैः नापिन्तलाङ्गुरुषादिदानैः नचक्रियाभिः श्रौतस्मार्तकर्मभिः नतपोभिः कृच्छ्रचान्द्रायणादिभिः नलोकेमनुष्यलोकेअनेकभूमौतदर्शनेनदृष्टमशक्यः कुरुप्रवीरेति निर्भयत्वेपिमयोक्तिरशुक्लेनिश्चिते ४८

वनमालीटीका. ८

एतद्रूपदर्शनात्मकमनिष्टंभक्तिमन्तरेणाहमर्जुनकुरुप्रवीरमित्यादिनेतिवेदानामध्ययनैरन्तरङ्गैरङ्गैः तथामीमांसाकल्पसूत्रादिद्वारायज्ञानांवेदबोधितकर्मणामध्ययनैरर्थविचाररूपैर्दानैरन्तरङ्गाङ्गुरुषादिभिः क्रियाभिरग्निहोत्रादिश्रौतकर्मभिः तपोभिः कृच्छ्रचान्द्रायणादिभिरुग्रैः कायेन्द्रियशोषकत्वेनदुष्करैरेवंरूपैर्नाहमनयाकः नलोकेमनुष्यलोकेदृष्टवदर्शनेवंभूतमन्तरङ्गभक्तेनदृष्टवान्नापरोक्षीकृतवान्नसाक्षात्कृतवान्कुरुप्रवीर शक्योहमितिवक्ष्यविसर्गतो ज्ञानादसः प्रत्येकंनकाराभ्यासोनिषेधदार्ढ्याय ४८

कमलवेजयन्तीटीका. ९

मद्भक्तिंविनाऽनेनाध्ययनेरीदृशोमत्प्रसादोनिर्लभेरन्निवेदान्तस्वाध्यायरूपस्यपुमानर्थेनामाह नवेदयज्ञाध्ययनैरिति वेदानामङ्गानिशिक्षादीनांतेषांमध्ययनैः पदक्रमज्ञानाभ्यासरूपैरन्तरङ्गैः यज्ञानांवेदबोधितकर्मणामध्ययनैर्मीमांसाकल्पसूत्रादिद्वारातदर्थविचाररूपैश्चनदानैः स्वेष्टभोग्यवस्तूनांसम्पात्रेभ्योऽर्पणैः नक्रियाभिरग्निहोत्रादिकर्मभिः नतपोभिः कृ

लणेभिर्वीडुक्करैर्देहशोषकैः एवंरूपेणशक्योहंनवदमेनम
हीतेल २ दृष्टक्रतुफलप्रेप्सुमदनुग्रहमेनरा ४८

नीलकंठीटीका. ९२

योगेकगम्यमेनंकर्मिणोऽष्वाप्तमित्याह नवेदेतिवेदानोंयज्ञा
ज्ञानोचग्रध्ययनैरग्निगमैःनचदानैः नचक्रियाभिःस्रुक्स्रुवा
भिरग्निहोत्रादिभिर्वापीकूपारामादिभिः नेष्टाभिःक्रतुभिर्वाज्ञाय
णाद्यैः उग्रैःमासोपवासाद्यैः नलोकेएवंरूपोहंदृष्टनशक्यः
रोकुंताभावश्राद्धैः नदमेनकुरुप्रवीर ४८

क्रोस्यस्वरूपस्येत्याह ॥ आनेरीटीका॥ यस्त्वेनंविधमेनंयोगेनशाम्नःसदृष्टमशु
शक्यग्रहमितिछान्दसस्तनिः ४८

व्यतिरिक्तेनास्यपारमेश्वरस्वरूप रामकंठीटीका सदृष्टमूशक्यत्वादतएवाह॥
वेदानायज्ञानावद्भत्वादधिगमवद्भत्वमधिगमशब्देनवाध्ययन
श्रवणादयोगृह्यंतेः व्रतानिपरिताः दानक्रियानत्पशुहेमरत्नादि
ने क्रियाशब्देनाष्टीयमानब्रह्मचर्यादिकर्मविशेषवाचकः
पतच्चैवंविधस्यराजाद्यवस्थितेरपिपरज्ञानमूलत्वादशक्यदः
र्शनमेतत्परंममरूपंमदनुग्रहादेवोन्मीलितदिव्यचक्षुषात्वया
दृष्टंनेत्राभ्यमोहादीनांकोवसरः प्रसन्नमत्स्वरूपमित्यानसंधा
नावहितानन्यभक्त्यालभ्यत्वादेवमस्तेवमित्यभिप्रायः ४८

+ किंचकालरूपसंवलितस्यविश्वा त्मकास्यदर्शनंमनुष्यलो केशक्यमित्याह॥

नवेदानोंचतपोभिर्यज्ञविद्यानाकल्पसर्वारीनों ग्रध्ययनैर्नचदा
नैर्नचक्रियाभिरग्निहोत्रादिभिः नोग्रैःकायक्लेशकरैनऽक
रणैःमनुष्यलोकेनदृष्टशक्यः ग्रयंतुयेवंरूपःकालरूपसंवलितोहमी
क्रुरुप्रवीरेतिसामर्थ्यसूचकमामंत्रणम् ग्रतोदृष्टमनुष्यःपरिछिन्न
भयानकवस्तुदर्शनोहंवमदनुग्राणांजनात् स्त्रीभाववाव्रजे
न्नमः ग्रतः ४८॥

एतद्दर्शनमतिदुर्लभंलब्धात्वंकृतार्थोसीतिस्तवन्नाह नवेदे-
ति हेकुरुप्रवीरअर्हन्लोकेमनुष्यलोकेएवंभूतंवेदयज्ञाध्ययने
नेनदृष्टंनशक्यः नवेदयज्ञाध्ययनैःचतुर्णामपिवेदयज्ञाध्ययने
यद्वावेदानांयज्ञविद्यानांकल्पसूत्रादीनांचाध्ययनैःनचक्रियाभि
नदानैस्तपोभिरुग्रैश्चोग्रैस्तपोभिर्ब्राह्मायणादिभिरहंदृष्टंनशक्यः
४८

श्रीवीरसमिहोचिनी

किंचकुरुप्रवीरेतिकुरुषमध्येप्रकर्षेणवीरोविक्रांतोयस्तस्य
संबोधनं अर्हन्लोकेमनुष्यलोके एवंरूप एवंप्रकाशितवि
श्वरूपोदृष्टंसाक्षात्कृतौर्लक्षयित्वं नदन्येनवेदोन्येनाभक्ते
ननपाकाशंति ननुयेद्विवेदादिकाविप्रोवेदान्त्वीकुर्वंति यज्ञांश्चत
दीयैरेवसंबद्धान्प्रोः प्रतिपादयंति तदध्ययनंच चतुर्वर्गफलसा
धनत्वावगमात् कुर्वंतीतिवेदाध्ययनस्य मोक्षंप्रतिसाधनत्वंसूचि
तमिति नचाच येदानपीलादानेनैवात्मानंसंभावयंतः पूर्तकर्म
कुर्वंति नेवफलसाधनत्वावधारणात् तथंदानमात्रंकुर्वंतीति
दानप्रतीतस्यापिमोक्षंप्रत्यधिकारित्वंसूचितमितीष्टापूर्तरूपाभिर्वै
दाध्ययनपूर्वकयज्ञदानक्रियाभिस्तपोभिर्घोरैः कर्मभिश्च
किंनैवंरूपोदृष्टश्चकोपिनप्रकाशयतीति किमनेन यन्मेत्वदन्येन
नदृष्टपूर्वेणत्वत्तोनेत्याशंक्याह नवेदेति एवंरूपोविश्वरूपोदृष्टवे
दैर्नापियज्ञदानादिभिः क्रियाभिर्दृष्टश्चकोभगवद्रूपेभावादि-
तिभावः ४८॥

मयभाष्य

भाषा अनुवाद

और यह अति दुर्लभ दर्शन पायके तुम अब कृतार्थ भये
हौं सोई कहते हैं कि न वेद अध्ययन सेन यज्ञ अध्ययन
कहे यज्ञविद्या जो कल्पसूत्र आदि कर्मकाण्ड के अर्थ सह
ह किये ग्रन्थ तिन से अर्थात् न यज्ञविद्या अध्ययन से और
दानन न्यासे न अग्निहोत्र आदि क्रियों से न सान्दायणा आदि उग्र क
हे कठिन तपस्यों के द्वारा यह मेरा रूप नरलोक मे देख
ने के शक्य है सो हे कुरुप्रवीर अर्जुन तुम को छोड़ि और
कोई नहीं नरलोक मे इस रूप को देखशका है सो तुम मे
रे अनुग्रह से इस मेरे रूप का दर्शन करि अपने को कृता
र्थ भये जानो ४८

चौपई

वेद न यज्ञ पढ़न दान हि सोई क्रिया कियें तपउग्र हि जो
है में नरलोक न याकों यह रूपहि कुरुप्रवीर तोहि अ
न्यन दर्शहि ४८॥

मातेव्यथामाचविमूढभावोदृष्ट्वारूपंघो
रंदृङ्मेदं व्यपेतभीःप्रीतमनाःपुनस्त्वं
तदेवमेरूपमिदं प्रपश्य ४९

शाङ्करभाष्यटीका १

मातेव्यथेति माते व्यथामाभूत्ते भयं माच विमूढभाव विमूढ
चित्तता दृष्ट्वोपलभ्य रूपं घोरमीदृक् यथावद्दृष्टं प्रीतममेदं व्यप
तभीर्विगतभयः प्रीतमनाश्चसन् पुनर्भूयस्त्वं तदेव चतुर्भुजरू
पंशङ्खचक्र गदाधरं तथेष्टं रूपमिदं प्रपश्य ४९

आनन्दगिरिकृतटीका २

विश्वरूपदर्शनमेवं स्तुता यद्यस्मादृष्टमानाहिभेषि तर्हितद्
पसंहरामीत्याह माते व्यथेति वक्ष्यतिचमनुभूतवमभिप्रप
तदेवेत्यन्तं इदमिति ४९ स्वामिकृतटीका. ३

एवमपिचेत्तवेदंघोररूपंदृष्ट्वाव्यथाभवति तर्हितदेवरूपं
दर्शयामीत्याह मातेइति ईदृक्करेदृशंघोररूपंदृष्ट्वातेव्यथा
मास्तविमूढभावोविमूढत्वंचमास्तुव्यपगतभयःप्रीतमना
स्त्वंपुनस्त्वंतदेवेदंममरूपंप्रपश्यप्रकर्षेणपश्य ४९

स्पष्टार्थम् ४९ ॥ विज्ञानभाष्यटीका ४ ॥ ॥

मातेइति ईदृशोररूपदर्शनेनतेयाव्यथायच्चेविमूढभावो
वर्ततेतेनचभयंमाभूत् तथाभवत्वंसर्वमेवसोमरूपंदर्शयामि
तदेवममरूपंपश्य ४९ रामानुजभाष्यटीका ५

स्पष्टार्थम् ४९ ॥ ॥ परमार्थप्रपाटीका ७

अतएवाह मातेव्यथेति ईदृशोरेभयानकंमेरूपंदृष्ट्वातेव्यथा
भंगुरत्वंविमूढभावोभ्रांतत्वंमास्तु अतःपरंव्यपेतभीःप्रीत
मनाःसन्तदेवपूर्वंरूपंपुनःप्रपश्य ४९

वनमालीटीका ८

इदंघोरमीदृगनेकवाह्वादियुक्तत्वेनातिभयंकरंममरूपंदृष्ट्वा स्थितस्यतेतवयाव्यथाभयनिमित्तापीडासामाभूत् तथाममरूपदर्शनेपियोविमूढभावोव्याकुलचित्ततयापरितोषवान्सोपिमाभूत् किंतुव्यपेतभीरपगतभयःप्रीतमनाश्चसन्पुनस्त्वंतदेववपुर्भुजंवासदेवादिविशिष्टंतयासदाभूतंवपुःप्रपश्यभयरहितेनसंतोषेणचप्रपश्य ५५

मधुसूदनीटीका ५

श्रीभगवानुवाचमयाप्रसन्नेनतवार्जुनेदंरूपंपरंदर्शितमात्मयोगात्तेजोमयंविश्वमनंतमाद्यंयन्मेत्वदन्येनदृष्टपूर्वं ननुमेरूपमिदंसुरेषुनचाहमेवंनरलोकवीरैर्शक्यस्त्वहंनृलोकेनृणांक्रियाभिर्यज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः ४७ मदीयंरूपंविश्वात्मकंतेजोमयंमयाप्रसन्नेनतवार्जुनेदंपरंरूपंदर्शितं आत्मयोगात्स्वसामर्थ्यात्तेजोमयंविश्वमनंतमाद्यं यन्मेत्वदन्येनदृष्टपूर्वं ननुमेरूपमिदंसुरेषुनचाहमेवंनरलोकवीरैर्शक्यस्त्वहंनृलोकेनृणांक्रियाभिर्यज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः ४७

पूर्वंत्वदन्यैरर्जुनादिभिर्नदृष्टं मदीयंरूपंविश्वात्मकंतेजोमयंविश्वमनंतमाद्यं यन्मेरूपंत्वयाविनाऽन्येनदृष्टपूर्वं ननुमेरूपमिदंसुरेषुनचाहमेवंनरलोकवीरैर्शक्यस्त्वहंनृलोकेनृणांक्रियाभिर्यज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः ४७

मधुसूदनीटीका ५

इदंघोरमीदृगनेकवाह्वादियुक्तत्वेनभयंकरंममरूपंदृष्ट्वा स्थितस्यतेतवव्यथाभयनिमित्तापीडासामाभूत् तथाममरूपदर्शनेपियोविमूढभावोव्याकुलचित्ततयापरितोषवान्सोपिमाभूत् किंतुव्यपेतभीरपगतभयःप्रीतमनाश्चसन्पुनस्त्वंतदेववपुर्भुजंवासदेवादिविशिष्टंतयासदाभूतंवपुःप्रपश्यप्रकटीक्रियमाणंप्रपश्यभयरहितेनसंतोषेणचप्रपश्य ५५

मधुसूदनीटीका ५

मानेभयनिमित्तेयेपीडाभूत्माविमूढता इदंघोरंमहद्रूपं मीदृक्भातिभयंकरे ५ दृष्ट्वासर्वात्मकंनानाकारयुक्तंममेश्व

रं निर्भयोभवप्रीतात्मापुनस्त्वंपश्यमद्रूपः तदेवचक्रगदा
संचतवीक्रंश्रियोज्वले ४९ नीलकंठीटीका ५२

इदमतिदुर्लभदर्शनेरूपेदृष्टापिचेद्यथासेनहिउपसंह
रामीदमित्याशयेनाह मातेइति ममरूपंईदृक्घोररूपं
दृष्ट्वानेतव्यथामाभूदितिशेषः विमूढभावोमोहस्ते
माभूत् व्यपेतभीःनिर्भयःप्रीतमनाश्चपुनस्त्वंभूत्वातदेव
यत्त्वयादृष्टंप्राग्रूपंतेममेदंरूपंप्रपश्य ४९

ज्ञानेश्वरीका स्पष्टार्थ

४९

रामकंठीटीका

घोरंकालपुरुषाद्याकृतियोगाद्उग्रंसंहारकर्मणाशिष्टंस्पष्टम् ४९

नासिकीरामकंठीटीका

ममेश्वरस्यरूपमीदृग्विश्वात्मकमिदंतद्रूपंतेघोरंकालपुरुषा
कृतियोगाद्भयंकरंदृष्ट्वामातत्त्वंव्यथाभयंमास्तु विमूढभावोमो
हेनास्तुतावन्मास्तु भयंकरंदर्शनेहिघोरस्यापिव्यथास्तुततोरम
त्वंत्वत्तएव विगतभयःप्रीतमना स्तुताभवेत्यप्रसन्नोवतासंस्तेपुनः
तेदेवेश्वररूपदर्शनात्माहएवंचतुर्भुजादिलक्षणामिदंपरिचिन्ते
नेदंतयापुरोभासमानंमेश्रीकृष्णरूपंप्रपश्य सम्यक्समाधिसं
स्कारमवश्य इष्टमर्हीभवत्वित्यभ्युपगमे ४९

पंचोलीटीका

यदापवमिदंघोरंरूपंदृष्ट्वातेव्यथाजायतेनहितदेवप्रागनुभू
तंरूपंदर्शयामीत्याह मातेव्यथेति हेअर्जुनममरूपंतीईदृक्
रूपंघोरंदृष्ट्वातेनवव्यथाभयंमाभूत्माचविमूढचित्तताभू
त् व्यपेतभीःविगतभयःप्रीतमनाःपुनस्त्वंतदेवचतुर्भुजेशांख
चक्रंगदापद्मधरंतवेष्टमेममरूपंरूपंप्रपश्य ४९

इदानीमेतादृग्रोरवरूपदर्शनेनमात्मतेव्यथेत्यादि मानेऽ
ति ममेदंदृष्यमानंग्रोरंविग्राकारंरूपमीदृग्यर्षादिजन
कंमयादर्शितंसंप्रति दृष्टतेव्यथाभयंचलनंवामात्मऽ
एवा विमूढभावश्चमूर्छितत्वमपिमात्मऽ किंतर्हि पुनर्भू
यएवप्रत्युतेदंरूपं नदेवतादावेनैवप्रकारेणालोकनेऽ
त्यादिप्रीतमनाः संस्तद्रूपस्यदर्शनकादनएवव्यपीतभी
र्भवसंत्यक्तसर्वोकमोहोभवेति वरदानलक्षणोभगवदनुग्र
हःसिद्धइति ५९॥

भाषा अनुवाद

जो ऐसा घोर भयानक रूप देखि तुम को क्लेश होता है
जो जिसमे तैसे मेरा रूप देखि यथा श्री मूढता न होय
इस से अब तुम विगतभय प्रसन्नचित्त होय फेरि हमा
रा सोई वह पूर्व रूप जो देखा चाहते हौं सो देखो ४५

चौपई

ना तोहि व्यथा न मूढता होई। घोर रूप मोहि देखे सोई भय
कर विगत हर्ष मन होऊ फिर देव रूप मोहि देखहु सोऊ
४६॥

संजयउवाच इत्यर्जुनंवासुदेवस्तथोक्त्वा
कंरूपंदर्शयामासभूयः आश्वासयामास
चभीतमेनं भूत्वापुनःसौम्यवपुर्महात्मा ५०

रामानुजभाष्यटीका १

इत्यर्जुनमिति इत्येवमर्जुनं प्रति वासुदेवस्तथाभूतं वचनं उ
क्त्वा स्वकं वसुदेवगृहे जातं रूपं दर्शयामास दर्शितवान् भूयः
पुनराश्वासयामास चाश्वासितवान् भीतमेनंभूत्वापुनःसौम्य
वपुःप्रसन्नदेहोमहात्मा ५० आनन्दगिरिकृतटीका २

प्रसन्नयोगपदं तदिदं इत्यं राज्ञे सूतोनिवेदितवानित्याह सञ्ज
य इति तथाभूतं वचनं मया प्रसन्नेनात्मचिन्तभुजं रूपं किंत
स्य रूपस्य परिचिन्तपूर्वस्य प्रसन्नदेहत्वेन चार्जुनं प्रत्याश्वासनं
भगवतोयुक्तमित्यत्र हेतुमाह महात्मेति ५०

स्वामिकृतटीका ३

एवमुक्त्वाप्राक्तनमेवरूपंदर्शितवानिति संजयउवाच इतीतिश्री
वासुदेवोऽर्जुनमेवमुक्त्वायथारूपमासीत् तथाकिरीटादियुक्तंच
तच्चतुर्भुजरूपंपुनर्दर्शयामास एवमर्जुनंभीतमेवं प्रसन्नवपुर्भूत्वा
नरंप्याश्वासितवान्महात्माविश्वरूपःकृपालुरितिवा ५०

विशालभाष्यटीका ४

स्पष्टार्थो संजय उवाच ५०

रामानुजभाष्यटीका ५

संजयउवाच इतीतिएवंपूर्वोक्तप्रकारेणवसुदेवसुतःकृष्णाभूयःस्व
कीयमेवचतुर्भुजरूपंदर्शयामास अपरिचिन्तरूपदर्शनेनभीत
मेनंपुनरपिपरिचिन्तसौम्यवपुर्भूत्वाश्वासयामासचमहात्मासत्य
संकल्पःसर्वेश्वरस्यपरमपुरुषस्यपरब्रह्मणोजगदुपकृतम
नुष्यवसुदेवसूनोश्चतुर्भुजमेवस्वकीयरूपंकंसभीतवसुदेवगा
र्थितेनकंसवधात्पूर्वंभुजद्वयमुपसंहृत्यपश्चादाविःकृतवा
नोसिदेवदेवेशशंखचक्रगदाधरादिवपूरूपमिदंदेवं प्रसादेनोप
संहरद्रूपमैश्वरमात्मनःरूपमेतच्चतुर्भुजमितिहिप्रार्थितंशिश

णलक्ष्मापिदिवनोःनवरतभावनाविषयेचतर्भुजमेववसुदेवसू
नोरूपेउदारपीवरचतर्बाहुंशंखचक्रगदाधरमिति अतःपार्थेनानेने
वरूपेणचतर्भुजेनेत्युच्यते ५·

स्पष्टार्थम् ५· अभिनवगमक्कनटीका ६

परमार्थप्रपाटीका· ७

पुनःसंजगादेति इत्युक्तप्रकारेवासुदेवउक्तास्वकंरूपंचतर्भु
जंदर्शयामास ५· वनमालीटीका ८

वासुदेवोर्जुनोनथेमुक्तास्ववत्क्रियतेप्रकाशपतइतिस्वकंरू
पंविश्वरूपंज्ञानतोस्ववत्प्रकाशयतिएतद्रूपंज्ञाननोवि
श्वरूपंस्ववत्प्रकाशयतिरूपेणपराएरत्वाधिकारिणमपेक्ष
भगवद्रूपेणतारतम्याभावात् यद्वास्वकंस्वकीयमर्जुनीयं सदा
र्जुनसंबंधंशंखचक्रगदादियुक्तं दर्शयामासभूयःआश्वासयामा
सचभीतमेनमर्जुनंभूत्वापुनःपूर्ववत्सोम्यवपुरनुग्रहशरीरः
महात्मापरमकारुणिकःसर्वेश्वरःसर्वज्ञइत्यादिकल्याणगुणाकरः ५·

रुसमवैनयन्टीका ५

एवमपरिचिन्नरूपदर्शनेनव्याकुलचित्तमर्जुनमुक्ताभगवांस्त
परिचिन्नमेवस्वकरूपंनेदर्शनवानितिसञ्ज्ञयोएतराष्टमुवाच
इत्यर्जुनमिति वासुदेवोवसुदेवपुत्रइत्येवमर्जुनमुक्तवा
स्वयंकल्पेनैवविश्वरूपदर्शनवालयेवभूयःपुनरपिस्वकंमेव
रूपंमयीतास्वरयरंकिरीटकुंडलकटकांगदकौस्तुभहारकटिसू
त्रपुराद्यनेकभूषणभूषितं शंखचक्रगदाद्योपशोभितमं
डरीकनयनंस्मयमानमुखांबुजंनिजंरूपंचतुर्भुजविग्रहं
दर्शयामास पुनःसोम्यवपुरतिकारुण्यवात्सल्यातिकांता
दिगुणयुक्तशरीरोभूत्वामहात्मामुदारमनाइमंनेनभगवतः
स्वयं नास्तिनिग्रहतिकत्वेपिभक्तार्थीनविग्रहंस्वविनेभीतं
अपरिचिन्नौराकारदर्शनेनभययुक्तमेनमर्जुनमाश्वासया
मासदेवार्थत्वममसिमतत्स्वभयेनालिस्वसारथिमामवलोक
येत्यादिनमेवंनेराश्वासितवान् चकारेणसर्वेश्वरस्यभगव
दयःक्रूराःसर्वेमनापवेसहमर्जुनमपिमत्तमपिमत्सखिति

¹ चित्रम

वासुदेवोर्जुनमिति प्राग्वत् शुक्लं यथापूर्वमासीत् तथाख्य
केयूरैकिरीटमकरकुंडलगदाचक्रादियुक्तं चतुर्भुजंश्री
वत्सकौस्तुभवनमालापीतांबरादिशोभितंदर्शयामासभू
यःपुनःआश्वासयामासचभीतमर्जुनमेनंभूत्वापुनःपूर्ववं
सौम्यवपुरन्यद्देहंशरीरंमहात्मापरमकारुणिकःसर्वेश्वरःस
र्वज्ञस्तादिकल्याणगुणाकरः ५०

सदानंदीटीका ११

इत्येवमर्जुनंप्रोक्त्वास्वकीयंरूपमीश्वरः किरीटिनंगदाशंखंच
क्रादियुतमद्भुतं चतुर्भुजंचश्रीवत्सकौस्तुभप्रभयान्वितं ८
वनमालापरीतांगंहारकेयूरशोभितं २ पीतांबरधरंस
र्वसौंदर्यैरसवाधिं दर्शयामासभीतमेनंभूत्वासौम्यवपु
र्हरिःपुनराश्वासयामासपूर्ववत्करुणाकरःसर्वज्ञःसर्व
शक्तिश्चकल्याणगुणसागरः ५०

नीलकंठीटीका १२

संजयउवाच इतीति वासुदेवः अर्जुनंप्रतिइतिपूर्वोक्तरी
त्याउक्त्वायथापूर्वमासीत्तथास्वकंमानुषंरूपंभूयःपुनर्दर्श
यामास यदर्जुनेनप्रार्थितंचतुर्भुजंधारणादिविषयंरूपंतद
पिनिरोढ्येत्यर्थः तथामहात्माव्यापकोपिसन्सौम्यव
पुरन्यद्देहंभूत्वाभीतमेनंआश्वासयामासच ५०

स्वामीटीका स्पष्टार्थं

श्रेयेतद्भूतराष्ट्रंप्रतिसंजय

उवाच ५०

रामकंठीटीका

श्रेयेतद्भूतराष्ट्रायसंजयउवाच किंतमहात्माविश्वरूपःसन्सौ
म्यवपुःपुनःप्राक्तनपुरुषविग्रहात्सदर्शनाकृतिर्भूत्वाभगवान्
नमर्जुनंतथाविधाद्भुतदर्शनमंत्रमात्रविनेवस्वमाणानप्रत्याश्वा
सयदितिनात्पर्यं

संजयउवाच त्यासिकी [illegible]टीका

एवंवासुदेवउक्त्वास्वकंरूपंकिरीटिनं
पुनर्भूयोदर्शयामासपुरुषेणप्रयुज्यते अर्जुनस्तत्पुरुषनिरस्त भ
गवोक्तप्रयोजकोभूदित्यर्थः समहात्माविश्वरूपः श्रीकृष्णः
कालरूपोपसंहारेणसमाधिसंस्कारनिरसनेनचसौम्यवपुः स
दर्शीकृतिर्भूत्वा एनंभीतंअर्जुनंपुनर्वेदमार्गानप्रकाशयामा
सयामासच सांत्वयामासच ५.

पंचोलीटीका

एवमुक्तप्रोक्तंतमेवरूपंदर्शितवानिति संजयउवाच इत्य
र्जुनमितिवासुदेवःअर्जुनंतथेतितथाभूतंवचनमुक्त्वाभूयः
पुनरपिस्वकंरूपंवसुदेवगृहेजातंदर्शयामासचपुनःमहा
त्मापुनःसौम्यवपुर्भूत्वाएनंभूतमाश्वासयामास ५.

रणवीरसमिहोत्रिनी॥

एतदेवस्पष्टयतिएनंभूतमइति संजयउवाच इत्यर्जुनमि
ति स्पष्टार्थः ५०॥

मयूभाष्य

५०॥

भाषा अनुवाद

ऐसे वचन कहि कर भगवान ने अर्जुन को वही सर्वरूप अपना देखाया यह सञ्जय धृतराष्ट्र से कहते हैं कि म हात्मा वासुदेव श्रीकृष्णजी ने अर्जुन को सोई चतुर्भुज कि रीटधारी अपना शान्त स्वरूप फेरि देखाया और डरे भये अर्जुन को आश्वास दिया ५०

चौपई

वासुदेव कहि नरको जैसे फिर निजरूप दिखायो तैसें
अल्पभय कहुं करी आश्वासा भय पुनसौम्य रूपजग वासा
५०॥

अर्जुनउवाच दृष्ट्वेदंमानुषंरूपंतवसौम्यंजना
र्दन इदानीमस्मिसंवृत्तःसचेताःप्रकृतिंगतः

५१ शाङ्करभाष्यटीका २

दृष्ट्वेदमिति दृष्ट्वेदं मानुषं रूपं मत्सखे प्रसन्नं भव सौम्य जनार्दनेत्यर्दतेर्गतिकर्म्मणोऽसुराणां देवप्रतिपक्षजनानां प्राणवियोगजनकत्वात्तथा प्रयोजने सर्वैर्जनैर्याच्यतइति वा जनार्दनः अभ्युदयनिःश्रेयसपुरुषार्थाय इदानीमयं नास्मि संवृत्तः संजातः सचेताः किंप्रसन्नचित्तः प्रकृतिं स्वभावं गतश्चास्मि ५१

आनंदगिरिटीका २

एवं भगवदाश्वासितः सन्नर्जुनस्तं प्रसादयन्नाह अर्जुनइति ५१

स्वामिटीका २

ततोनिर्भयःसन् अर्जुनउवाच दृष्ट्वेदमिति सचेताःप्रसन्नचित्तः इदानीं संवृत्तोऽस्मिप्रकृतिंस्वास्थ्यंचागतोस्मि शेषंस्पष्टं सुकृतस्यानुग्रहस्यातिदुर्लभत्वंदर्शयन् ५१

पिशाचभाष्यटीका ४

अर्जुनउवाच दृष्ट्वेदमिति इदंपरंप्राप्तिकारणं ५१

रामानुजभाष्यटीका ५

अर्जुनउवाच दृष्ट्वेति अनवधिकातिशयसौंदर्यसौकुमार्य लावण्यादियुक्तेनवैवासाधारणेमनुष्यसंस्थानस्थितमति सौम्यमिदंरूपंदृष्ट्वा इदानींसचेताः संवृत्तोस्मिप्रकृतिंगतश्च ५१

अभिनवगुप्तकृतटीका ६ ॥ ॥

स्पष्टार्थम् ५१ ॥ ॥

परमार्थप्रपाठीटीका ७

पुनरर्जुनः प्राह दृष्ट्वेदमिति मानुषंमनुष्येईदृग्योगंप्रसन्नचेताः प्रसन्नचित्तः संवृत्तोजातोस्मिप्रकृतिंस्वास्थ्यंचगतोस्मि ५१

वनमालीटीका ८

इदानींसचेताभयकृतसम्मोहाभावेनाव्याकुलचित्तः सं

श्री. गी. टी. ए

हतोस्मि तथाप्रकृतभयकृतयथागहितेनस्वास्थ्यंगतोस्मिस्व
ष्टमत्यत् ५१

रामानुजगीताटीका ५

भगवतस्सौम्यरूपादर्शनान्नदास्यामनाश्वनिर्भयःप्रीतविनःस
जर्जुनउवाच दृष्ट्वेदमिति हेजनार्दनेत्यनेनसंबुद्धजनात् हत्वा
स्वजनान्नस्यान्नतिष्ठामेवेतिस्नेहविनम् नवविग्रहरूपस्यानेतवि
भूतिपतेःसर्वेश्वरस्येदमत्रेत्रविषयभूतेसौम्यंतिरश्चिकांति
शयंसौदर्शंसौकुमार्यंसौहार्दंसौगन्ध्यंसौस्पर्शंसौशील्यंसौरस्य
लावण्यमनोज्ञादिगुणविशिष्टमानुषंमानुष्यतनुसंस्थानस्थितं
रूपंदेहंदृष्ट्वेदानीमद्यसचेताःप्रसन्नविनःभयकृतनाशाभा
वेनाव्याकुलविनइत्यर्थः संवृत्तोस्मिजातोस्मितथाप्रकृतिंगतः
भयकृतंयथागहितेनस्वास्थ्यंप्राप्तोस्मि एवंमयाप्रसन्नेनतवा
र्जुनेदंनवेदयज्ञाध्ययनैर्नेतिहाभांस्वस्यविश्वविग्रहस्यदर्शं
नमुक्तमधुनासदर्शयामिदमित्यादिनामत्कर्मकृदित्यनेनस्वक
स्यमानुषविग्रहस्यापिसदर्शनादर्शयन् ५१

मधुसूदनटीका २

ननोनिर्भयःसन्— इदानींसचेताः भयकृतनाशाभावेनाव्याकुलविनःसंवृतो
स्मि तथाप्रकृतिंभयकृतयथागहितेनस्वास्थ्यंगतोस्मि सदृष्टम
मत् ५२

सदानंदीटीका. ११

ननोस्मिनिर्भयोभूत्वाव्याकुलमाहार्जुनोहरिं दृष्ट्वेदंसौम्यरूपंनेवा
सदेवाभियंपरं १ इदानींनिर्भयोभूत्वास्वास्थ्यंप्राप्तोस्मिनागतः ५१

नीलकंठीटीका. १२

ननोनिर्भयःसन्नर्जुनउवाच दृष्ट्वेति सचेताअव्याकुलः प्रकृतिं
गतःस्वास्थ्यंप्राप्तः सेहनोजातोस्मि ५१

ननोनिर्भयःसन्नः र्जुनउ आनंदीटीका सदृष्टार्थः

वाच ५१

वाच-सदृष्टमेतत् ५१ रामकंठीटीका॥ ५१ एवंश्रुत्यागतप्रकृतिरर्जुन उ

लालसी टीका

ततः समाधिक्लेशोऽर्जुन
उवाच हे जनार्दनेदृशं स्फुरत्सौम्यं तवदर्शनं मानुषं रूपंतवदृष्ट्वाइदानीमु[illegible]
स्थानेप्रकृतिंस्वस्वभावंजीवत्वरूपंगतः प्राप्तः सन् सचेताश्चेतः कारणान्
विनोदंसंप्रसन्नः संपन्नः [illegible] ५१

पंचोलीटीका

ततोनिवर्त्यमानभयोर्जुनउवाच दृष्ट्वेदमिति हेजनार्दनतवे
दंसौम्यंमानुषंरूपंदृष्ट्वाइदानीमधुनासचेताःप्रसन्नचित्तःसंप्रत्त :
संजातःप्रकृतिंस्वभावंगतोऽस्मि ५१

श्रीवीरसमिद्धोथिनी॥

एवंभगवतोविश्वरूपंदृष्ट्वाजाताद्भादोर्जुनउवाच दृष्ट्वेदमि
ति श्रीजनार्दनेतिसंबोधनमनिष्टनिहन्तीष्टप्राप्तिसाधनत्वा
त्तवेदंमानुषंमनुष्यभावनायुक्तं सौम्यमाह्लादकंस्वरूपंदृष्ट्वेदानी
मेवसंप्रत्तःस्वधर्मस्थेचभगवद्भक्तिमूलस्यमोक्षं
प्रतिसाधनत्वावथारण्यादित्येनादृष्टोदंसचेताः वेत्यतेस्वभा
वोनेनेतिचेतः स्वभावसंवित्तेन सदवर्तनेऽतितत्संवित्येवप्र॰
कृतिंसद्भावंगतः संप्राप्तस्वस्वभावइतियावदिति ५१॥

मधुभाष

५१॥

भाषा अनुवाद

तिसके अनन्तर निर्भय होय अर्जुन ने कहा कि हे जनार्दन
न तुमारा यह शान्त मनुष्य स्वरूप देखि मैं अब प्रसन्नचित्त
भ्रो सावधान भया हौं ५१

दोहा

मनुज रूप यह देखके सौम्य जनार्दन तोर स्वधर्मस्थित
अबमें भयो स्वाभावक चितमोर ५१

170

श्रीभगवानुवाच सुदुर्दर्शमिदंरूपंदृष्टवा
नसि यन्मम देवाश्चप्यस्यरूपस्यनित्यंदर्श
नकांक्षिणः ५२ शाङ्करभाष्यटीका १

सुदुर्दर्शमिति सुदुर्दर्शं सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्श
मिदं रूपं दृष्टवानसि यन्मम देवादयोऽप्यस्य मम रूपस्य नि
त्यं सर्वदा दर्शनकाङ्क्षिणोदर्शनेऽपीव न त्वमिव दृष्टवन्तो न
हीत्यभिप्रायः ५२ आनन्दगिरिकृतटीका २

उपास्यतया विश्वरूपं स्तोतुं भगवदिष्टं दर्शयति भग
वानिति नह्यतिरिक्तानामिदं रूपंदृष्टमशक्यमिमन्यद्दर्श
यति देवादयइति ५२ स्वामिकृतटीका ३

यन्मेविश्वरूपंदृष्टवानसितत्सुदुर्दर्शमत्यंतंदृष्टमशक्यमतोदे
वाश्चप्यस्यरूपस्यदर्शनमिच्छंतिकेवलेनपुनर्मेदंपश्यंति ५२
पिशाचभाष्यटीका ४
॥ ॥
स्पष्टार्थं ५२ रामानुजभाष्यटीका ५

श्रीभगवानुवाच सुदुर्दर्शमिति ममेदंसर्वस्यप्रशासनेवस्थि
तंसर्वाश्रयंमर्वैकारणभूतंयत् दृष्टवान्ननुसुदुर्दर्शंनन
केनापिदृष्टंशक्यंस्वरूपस्यदेवाश्चपिनित्यंदर्शनकांक्षिणः
नतदृष्टवंतः ५२ अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५२ परमार्थप्रपाटीटीका ७

पुनर्भगवान् सुदुर्दर्शंसुतरांदुःखेनापिदृष्टमशक्यंममरूपंय
दृष्टवानसिश्चस्यरूपस्यदेवाश्चपिनित्यंदर्शनमिच्छंतिमनोरथ
मात्रेकुर्वंतिपरंनुन प्राप्नुवंति ५२
वनमालीटीका ८

स्वकृतस्यानुग्रहस्यातिदुर्लभतंदर्शयतिसुतर्भिःममयद्
यमिदानीतंदृष्टवानसि इदंविश्वरूपंसुदुर्दर्शं यन्मंतंदृष्टमश

कं यतोदेवाश्रप्मस्रूपस्यनिमेसर्वदादर्शनकोतिणोनतत्व
मिवदृर्वदृष्टवेतनवाग्रेदृस्येतीमभिप्रायःदर्शनकोतायाम्लो
कः ५२

रुक्ममवैजयन्तीटीका ५

श्रीभगवानुवाच सुदुर्दर्शमिदमिति ममसर्वविश्वप्रशासनेः
वस्थितस्यसर्वाश्रयस्यसर्वकारणभूतस्यस्वरूपंविश्वरूपद
र्शनात्माकृतदृष्टवानसितदेवदमिदानीतनरूपंयदकलोड
वंदेवकीपुत्रमनुष्याकारविग्रहंसुदुर्दर्शनकेनापिदृष्टपूर्वं
विश्वरूपंसुदुर्दर्शमिदंतुसुदुर्दर्शमितिविशेषः अस्यसुदुर्दर्श
तमेवाह देवाइति अस्यमनुष्यतनुस्थास्थितस्यरूपस्यदेवा
अपिब्रह्मादयोपिनित्यमनवरतंदर्शनकांक्षिणोसततदृष्टव
तः अयंभावःयथाभगवतोममविश्वविग्रहस्यनोवलेस्वर्यो
दीनांकूरतमभयंकरत्वादीनांचगुणानांद्यात्यापरमप्यस्ति
मितियेथात्मनदेवैरपिनज्ञातोमनुष्यस्यकाकथातथाकृस
रूपेमनुष्यविग्रहेपिसौदर्यलावण्यबलपौरुषवृद्धादिभि
र्गुणैःपशुचारणतपरदारहरणबन्धनविग्रभयपलायन
बलात्कारक्षिप्तादिकर्मभिश्चाहतमीश्वरतयाथातथ्यंवब्रह्मा
दयोपिनजानंतीतरेकिमुवक्तव्यमतोमदनुग्रहेणैवसुदुर्दर्श
मम्यथासुदुर्दर्शमिति ५२

सुकृतस्याश्रयस्यानि
र्लेभत्वंदर्शयन् चाह
भिः श्रीभगवानुवाच

मधुसूदनीटीका ५३

ममयद्रूपमिदानींत्वंदृष्टवानसि इदंविश्वरूपंसुदुर्दर्शमसंते
दृष्टमशक्यंयतो देवाश्रप्मस्रूपस्यनिमेदर्शनकांक्षिणः
नतत्वमिवदृर्वदृष्टवंतः नवाग्रेदृस्येतीमभिप्रायः दर्शना
कांक्षायानिमंत्रोकः

५२

सदानंदीटीका ५३

सुकृतस्यप्रसादस्यसुलभत्वंप्रदर्शयन् उवाचभगवानेवं
स्वभावस्यजनंप्रति १ विश्वरूपंमदीयंयत्वमिदंदृष्टवानसि
तदसंतमशक्यंहिदृष्टुंदेवैरपि २ देवास्तुदृष्टुमिच्छंतिम
ततेसानिध्यमपिनतेतमिवदृर्वतेदृष्टवंतः कदाचन नचै
वाग्रेदृस्येतिश्रीहरेरयमाशयः ५२

नीलकंठीका ५२

अस्यविश्वरूपदर्शनस्यदौर्लभ्यंदर्शयन् श्रीभगवानुवाच
सुदुर्दर्शमिति दर्शनकांक्षिणः दर्शनेकांक्षेणेवनलभ
ते ५२

अस्यरूपस्यदुर्लभदर्शनतांआख्याय श्रीरंगीटीका न श्रीभगवानुवाच ॥
देवाब्रह्मादयोपिनत्रत्तगीदिस्वाधिकारब्रह्मविनतयापरमदुर्ल
त्वभावः ५२

अर्जुनाभासायभगवानुवाच॥ रामकंठीटीका
निगदव्याख्यातप्रायमेतत् यतःस्वर्गादितत्तत्स्वाधिकारब्रह्मवि
त्रह्मादपरामृष्टस्वभावात्तस्मादयोदेवा अप्यस्यरूपस्यसदासाक्षा
त्कारमभिकांक्षंतिनतल्लभंते ५२॥

नासिकी वसुमतीटीका॥ सुदुर्दर्शमत्यन्तदुर्लभंयत्
दर्शयन् दृष्टवान्मात्तवान् अस्यरूपम् ५२ ॥

पंचोलीटीका

सुदुर्दर्शमत्यन्तदुर्लभंयत्वंदर्शयन् श्रीभगवानुवाच
सुदुर्दर्शमिति हेअर्जुनममरूपंसुदुर्दर्शंसुष्ठुप्रतीवदुर्दर्श
लिंगोभवंति ५२

रणवीरसमिद्धेरिनी॥
अथभगवानर्जुनेनेत्थंनराख्यास्वसखिनमाह सुदुर्दर्शमिति
गतार्थमेतच्छ्लोकद्वयं ५२॥

मधुभाष्य

५२॥

भाषा अनुवाद

तिसके बादि भगवान अपनी कृपा की दुर्लभता देखाव
ते हैं कि जो यह हमारा विश्वरूप स्वरूप तुम ने देखा
इस का दर्शन अति दुर्लभ है देखो देवतागण भी इस रू
प के दर्शन की इच्छा सर्वदा करते हैं परन्तु इसका दर्श
न नहीं पावते हैं ५२

दोहा

दुर्लभ अतिशय रूप यह जो मम देखा तेहुं सब अभिलाखी
दर्शके नित्य यादि रूपके पहुं ५२॥

173

नाहं वेदैर्न तपसा न दानेन न चेज्यया श
क्य एवंविधो द्रष्टुं दृष्टवानसि यत्तम ५३

रामानुजभाष्यटीका १

कस्मात् नाहमिति नाहं वेदैः ऋग्यजुःसामाथर्ववेदैश्चत
र्भिरपि न तपसोग्रेण चान्द्रायणा दिना नदानेन गोभूहिरण्ण
दिना न चेज्यया यज्ञेन पूजया वा शक्य एवं विधो यथा दर्शि
तप्रकारोदृष्टमभेरशक्योदृष्टवानसि मां यथा त्वं ५३

आनन्दगिरिकृतटीका २

दर्शनोपायाभावात् उर्दर्शयमिति शङ्कते कस्मादिति वेदादिसूण
योष सत्स्वपि भगवानुक्तरूपोनशक्योदृष्टुमित्याह नाहमिति न
हिं दर्शनायोग्यत्वात् दृष्टमशक्यत्वमित्याशंक्याह दृष्टवानिति ५३

स्वामिकृतटीका ३

नत्वदेतन्नोहमितिस्पष्टार्थः ५३ विज्ञानभाष्यटीका ४ ॥ ॥

॥

स्पष्टार्थम् ५३ रामानुजभाष्यटीका ५

नाहमितिभक्तोति वेदै श्रध्यापनप्रवचनाध्ययनश्रवणाज्ञपवि
धयेर्योगदानहोमनयोगैश्चमद्भक्तिविरहिनैः केवलैर्यथावदव
स्थितोहं दृष्टुमशक्यः ५३ अभिनवगुप्तकृतटीका ६

नमोनमस्तमनेनयोनः पूर्णंभक्तातिशयाविष्कारार्थंयदेवभग
वतानिर्णीताध्यायैरभ्यधायस्वस्वरूपं तदेवार्जुनः प्रमत्तोपलंभ
विषयापनेस्तोत्रद्वारेणप्रकटयतीतिनिष्ठाख्यानंकेवलेयोनरू
पप्रसंगायेतिविरम्यते ५३ परमार्थप्रकाशटीका ७

नाहंवेदैरितिगतार्थं [illegible]

[illegible] ५३ वनमालीटीका ८

कस्माद्देवापनरूपेणदृष्टवंतोनवाहस्यतिमदीयनाटपानुग्रह
सूत्रत्वादित्याह नवेदयज्ञाध्ययनैरित्यादिनागतार्थः श्लोकःपरम
इलेभक्तख्यापनायाभ्यस्तः ५३

श्री.
गी.टी.

यथाममविश्वरूपंभक्तिहीनैःपुरुषैर्वेदाध्ययनादिभिःसाधनै
ईदृशोनयामनुष्यरूपमपीमाह नादेवैरिति यथातेमाव
षरूपंमादृष्टवानसितथैवविधोवसुदेवसूनुर्हिभुजश्चतु
र्भुजोवात्मारथिरहंमद्भक्तिशून्यैःकेषांचिदपिपुरुषवेदाध्यय
नादिभिरपिसाधनैरदृष्टोनशक्यः ५३

कस्मादेवापतद्रूपंनदृ
ष्टवतोनवाऽद्रक्ष्यतिमद्भ
क्तिशून्यत्वादित्याह॥

मधुसूदनीटीका १०

नवेदयज्ञाध्ययनैरित्यादिनागतार्थोयंश्लोकःपरमदुर्लभत्व
ख्यापनायपुनरभ्यस्तः

५३

सदानंदीटीका ११

कुतएतन्नदेवाल्लेदृष्टवतानवापुनः द्रक्ष्यतीतिशृण्वतेमद्भ
क्तिर्यास्यैमलत्तमा १ नृयेषांसामुत्पन्नानतेनज्ञाधिकारिणः
वेदैरधीतेरूपसादानेयज्ञैरदृष्टवान् २ दृष्टमेवंविधोनाम्नि
शक्योदृष्टोयथात्वया १ ५३

नीलकंठीटीका १२

नाहमिति नवेदयज्ञाध्ययनैरित्यनेनोक्तपदार्थः पुनरुच्यते
विश्वरूपदर्शनस्यातिदौर्लभ्यसूचनाय सप्तार्थश्चश्लोकः ५३

ज्ञानेदीटीका स्पष्टार्थम् ५३ मुक्तोपायमाह॥

रामकंठीटीका

ततःसतरामर्वेणाकेनविदुष्करदर्शनमेतद्यत्तयामत्वसाराविभू
तपरमानवत्त्वाद्दृष्टमतोयथामोक्षतःसाक्षात्कृतवांस्तथादाना
दिक्रियामक्तैरीदृशश्चकोः

लक्ष्मिकी[illegible]टीका

तत्रहेतुः॥ सप्तोर्थः [illegible] ५३ ॥ ॥

पंचोलीटीका

नाहमिति नवेदैः ऋग्यजुःसामाथर्वभिःतपसोग्रेणचैवायणा
दिनानदानेनदानेनगोभूहिरण्यादिनानचैज्ययायज्ञेनप्रशमेया
दिनापवेविधोइहुंनशकाःयथावंमांदृष्टवानसि ५३

रणवीरसमिद्धोयिनी॥

स्पष्टार्थः ५३॥

मधुभाष्य

५३॥

भाषा अनुवाद

जस अपने रूप के दुर्लभ दर्शन मे कारण कहते हैं कि
तुम ने जो रूप मेरा देखा वह वेद अध्ययन औ तपस्या
या दान यज्ञ के द्वारा किसी को देखने की सामर्थ्य नहीं है ५३

दोहा

नामे तपयज्ञदान सें वेदहि मे पुनपक्ष यहविध देष न
याका हों जिहविध देखातेहु ५४॥

186

भक्त्यात्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ५४

पाण्डुरभाष्यटीका १

कथं पुनः शक्यत्वमनेन भक्तिमात्रेण किं विशिष्टयेत्याह अ
नन्यया अदृष्टयगभूतया भगवतोऽन्यत्र पृथक् न कदाचिदपि
भवति सा तनन्या भक्तिः सर्वैरपि कर्मणोर्ध्वसंदेहादनन्त लभ्यते
यया सानन्या भक्तिस्तया शक्योऽहमेवंविधो विश्वरूपप्रकारेऽहं
अर्जुन ज्ञाने शास्त्रतोन केवले ज्ञाते शास्त्रतोऽदृष्टे च साक्षात्कृ
तें तत्त्वेन तत्त्वतः प्रवेष्टुं च मातुं च गन्तुं परंतप ५४

आनंदगिरिटीका २

केनोपायेन तर्हि द्रष्टुं शक्योभगवानिति पृच्छति कथमिति श्रु
त्यर्थज्ञानद्वारा तद्दर्शने सफले भवतीत्याह उपायतइति नभक्ति
मात्रं तत्र हेतुरिति तत्राह्यर्थस्फुटयति किमित्यादिना अनन्यभ
क्तिमेव व्यनक्ति सर्वैरिति ५४

स्वामिटीका ३

केनोपायेननहिंतेद्रष्टुंशक्यइतिनाह भक्त्येति अनन्ययाभक्तिये
त्यादिभक्तानएवंभूतोविश्वरूपोदर्शनेनपरमार्थतोज्ञातुंशक्यः शा
स्त्रतोदृष्टुंचशक्यतत्त्वतःप्रवेष्टुंचतादात्म्येनशक्योनान्येकदाचेः ५४

रामानुजभाष्यटीका ४

स्वष्टार्थम् ५४

अनन्ययाभक्त्यातत्त्वतः शास्त्रेज्ञातेतत्त्वतः साक्षात्कर्तेतत्त्वतः प्रवेष्टुं
शक्यः तथाचस्मृतिः नायमात्माप्रवचनेनलभ्योनमेधयानबहू
नाश्रुतेनयमेवैषवृणुतेतेनलभ्यस्तस्यैष आत्माविवृणुतेतनूंस्वा
मिति ५४

अभिनवगुप्तटीका ५

स्वष्टार्थं ५४

परमार्थप्रकाशटीका ६ यतोऽभिचारिण्यामक्त्यातत्त्वेनहा
तेशास्त्रतःदृष्टुंप्र—तत्त्वतःप्रवेष्टुंतादात्म्येनशक्यः नान्यथा ५४

वनमालाटीका ७

वेदतपोदानेज्यादिभिर्द्रष्टुमशक्यस्तेनहिकेनोपायेनद्रष्टुंशक्योमीत

नत्वनन्यभक्त्येतिसाधनान्तरव्यावृत्त्यर्थंत्वशब्दः भक्त्यैवानन्ययामदेक
निष्ठयासंवीतमत्तज्ञानपूर्वकाविच्छिन्नप्रेमप्रवाहरूपया एवंविधो
दिव्यानेतनिरतिशयैश्वर्यविशिष्टविश्वरूपवानहंशास्त्रतोज्ञातेशक्यो
ऽग्रहमितिच्छेदसोविसर्गलोपः नकेवलेशास्त्रतोज्ञातेशक्योपि
नतत्त्वेनदृष्टुंच एतादृशभक्तिपूर्वकवेदान्तश्रवणमननिदिध्यास
नादिभिरनन्यप्रयोजनैस्तैर्योविश्वरूपात्मनेनरूपवान्स्वयोग्य
तानुसारेणगृहीतयासाक्षात्कर्तुंशक्यः प्रवेष्टुंमत्साक्षात्कारानन्त
रंमत्प्रसादेननिर्हृतनिशेषाविद्यतयामुक्तेनशक्यः प्रवेशो
हिभगवत्साक्षात्कारादिकंनलोकप्रवेशः साक्षात्कारादिरूपंसंश्लेषविशे
षएववामवेशः ५४

अनन्यभक्तेनयन्नीकाः ५

ननुयदिवेदनपोदानेज्याभिरिष्टुंमशक्यस्तर्हिकेनोपाये
नद्रष्टुंशक्योऽसीतिचेन्नाह भक्त्यानन्ययेतिनशब्दः साधनान्त
रनिराकार्यार्थकः हेऽर्जुनयथाविधाक्तनिरूपभक्तोवद्रष्टुंशक्योना
न्यैरुपायैस्तथैवंविधोनशक्यस्त्वन्मुखोऽहमनन्यशाऽभिवा
दिनादेवानोपासनरहितयाभक्त्यासाध्यसाधनरूपयापराप्तया
शक्यः किंकर्तुंशक्योऽसीत्यपेक्षायामाह ज्ञातुमितिवेदनादिशब्दै
स्तेनयाथात्म्यस्वरूपगुणादिकत्वेन ज्ञातोद्रष्टुंचपुनस्तत्त्वेनद्रष्टु
साक्षात्कर्तुंचपुनस्तत्त्वेनप्रवेष्टुंमद्भावापत्तिलक्षणंमोक्षप्राप्तुंश
क्योनान्यैरुपायैरितिशेषः नायमात्माप्रवचनेनलभ्योनमेधयानव
हुनाश्रुतेनयमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनूंस्वा
मित्यादिश्रुतेरप्यर्थात्तात्परतयैतिसंबोधनेनमद्भक्तिरहिता
नसाधनकदम्बात्मकशास्त्रनाशक्यत्वमेवाभिप्रेतमः रतिसूचितम् ५५

मधुसूदनीटीकाः-

यदिवेदतपोदानेज्याभिर्द्रष्टुमशक्यस्त्वंतर्हिकेनोपायेद्रष्टुंशक्योसीत्यतआह

साधनान्तरव्यावृत्त्यर्थंत्वशब्दः भक्त्यैवान्ययामदेकनिष्ठयानि १
दिध्यासप्रीतिपूर्वकविच्छिन्नप्रेमप्रवाहरूपयाह ज्ञातेशक्यः शास्त्रतः हेअर्जुन
शक्यः अनन्ययाभक्त्याकिंतुनकेवलेशास्त्रतोज्ञाते
र्वेदान्तवाक्यश्रवणमननिदिध्यासनपरिपाकेनततः विच्छेद
साक्षात्कारादविद्यातत्कार्येनिवृत्तौतेनप्रवेष्टुंचमद्रूपतयैवावं
वाहंशक्यः हेपरंतपशत्रुमर्दनेतिप्रवेशयोग्यतासूचयति

नायप्रेमीकृतोच्यते ५४ सदानंदीदीका ११

यदिदृष्टमशक्यत्वेनयोवेदाधरादिभिः केनोपायेनतन्नहिदृष्टुं
शक्योसिचेतिचेत् १ साधनांतरव्याहतेनशब्दोवोध्यत्वमेः म
देकनिष्ठयाप्रेमभक्त्यैवाहंमदेश्वरः २ दिव्यरूपधरोज्ञानेशक्यः
शास्त्रानरोनमेः साक्षात्कर्तुंस्वरूपेणवेदवाक्योक्तयाधिया श
क्यस्त्वसिसदाप्रेमभक्त्यैवाराधितोजनैः साक्षात्कारमदविज्ञानका
ग्रहाभावेनतः ४ सत्स्वरूपतयैवान्येशक्योहंहेपरंतप अन
न्ययैवभक्त्यात्वंसदाभीमाप्रयान्नेन ५४

नीलकंठीटीका १२

कथंतर्हिदृष्टुंशक्यत्वमतआह भक्त्येति भक्त्याश्राराधनेन अन
न्यया अव्यभिचारितयाश्रवणाद्यैरित्यर्थः अहंएवंविधोज्ञातेशक्यः
वेदार्थशोधकशास्त्रतः दृष्टुंशक्योभानतः तत्त्वेनयाथात्म्यत
प्रवेष्टुंशक्यस्तत्त्वमसिवाक्यार्थज्ञानतः हेपरंतप शत्रुतापन
परंतपः ५४

सदानंदीदीका स्पष्टार्थः ५४ ॥

रामकंठीटीका

केनतर्ह्युपायेनशक्योसीत्याह ॥
भक्त्यामदिक्ष्वयेवपरदेवमगोभिज्ञातज्ञेसत्यभयापरिचर्ययानन्य
भागदेवाविभक्तसम्यग्ज्ञानत्वाद्विद्यमानमद्यतिरिक्तभजनीयवि
षयत्वेसत्यनन्ययाज्ञातुमविमे वारिनावगमेनवोढुंतयासम्यग्ज्ञान
लक्षणोनोपायेनदृष्टुंगोचरीकर्तुंनशक्तोहंज्ञेयोयपरिशीलनाभा
सातिशयात्मवेष्टुमात्मतयावगाढुमेवंविधोयथावयाद्रुमः पू
र्वोहंनान्येरुपायैस्तेवपरमास्मस्वरूपमसाक्षात्प्रमातुंवेप्रपर्यंतो
परांभूमिमधिरूढस्तेनदुस्तरहैतमोहमागराद्गुतीर्णाःसमाश्रयमिहि
कृतस्तवेदानीमदृष्टपरमार्थजनोविनेभयादिदोषेः संबंधस्यर्थः
५४ ॥

लालिकी [illegible] टीका

नन्वेवंचेत्केनोपायेनतर्हिदृष्टुंशक्योइतिस [illegible] तत्राह ॥

अनन्ययाभक्त्यातिरिक्तयाकांक्षणीयरहितयाभक्त्या प्रेमातिशय
पूर्वकेनोपासनेन एवंविधस्वभावोविश्वात्मकोहंज्ञातुंअतत्त्वभिन्ना
तम् द्रष्टुंसाक्षात्कर्तुंप्रवेष्टुंमोक्षतयावगन्तुंचशक्यः नान्येरुपाये
रत्वधारणोसाधनोत्तरत्वाद्दृष्टार्थः ५४

पंचोलीटीका

केनोपायेनतर्हिद्रष्टुंशक्यइतिनत्राह भक्त्येति हेअर्जुनत्व
नः अहमेवंविधोअनन्ययाभक्त्यानविद्यतेअन्यउपायोयस्यसा
तयाअनन्ययाभक्त्यासर्वैरपिकरणैर्वासदेवादन्नोपलभ्यते
तत्त्वेनतत्त्वतः याथात्म्येनद्रष्टुंशक्यः चपुनःअन्यत्शास्त्रनोज्ञात
द्रष्टुंपरमेश्वरेणैवंगंतुंहेपरंतपअहंशक्यः ५४

रणवीरसमिहोयिनी॥

भक्त्येति हेअर्जुन भक्त्यानन्यभक्त्योयज्ञादिभ्योविशिष्टयदश
मिसाधकत्वद्योतकः अनन्ययाऽन्यैर्नाविद्यतेयाभक्त्यार्थादद्ध
नकर्मरागोमम्मद्वेषःश्रवणकीर्तनध्यानात्मिकयाशुश्रूष
याद्रमेव श्रवणादिकंमनोज्ञानंतद्रूपेणद्रष्टुंतत्त्वेनयथार्थ
हेतुनाप्रवेष्टुंचभक्त्यैवनाकोनत्वन्यया यतसाध्यस्वर्गा
कामेष्टयेतिभावः ५५॥

मधुभाष

५८॥

भाषा अनुवाद

जो के वि कोन उपाय से आप दर्शन दे सकते हो जो यह कहो
जो कहते हैं कि हे अर्जुन अनन्य कहे एकचित्त भक्ति हो के
द्वारा ऐसे विश्वरूप से हम प्रगट होसकते हैं और वह भक्त
भी हमें जानि सके है और हे परन्तप अर्जुन शास्त्र से प्रवेश
जो तत्वतः रूप प्रवेश अर्थात् उस रूप मे लीन हम कराय स
कते हैं और कोई भी उपाय नहीं है ५५

दोहा

अनन्य भक्ति कर प्राप्त में अर्जुन यादि विधान जानन देखन
तत्वसें प्रवेश परंतप ज्ञान ॥ ५५

[illegible]

मत्कर्मकृत्मत्परमोमद्भक्तःसङ्गवर्जितः
निर्वैरःसर्वभूतेषुयःसमामेतिपाण्डव ५५
इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मवि
द्यायोगशास्त्रेश्रीकृष्णार्जुनसंवादे वि
श्वरूपदर्शनोनामैकादशोध्यायः ११

शाङ्करभाष्यटीका १

अधुना सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थोनिःश्रेयसार्थीनुष्ठे
यत्वेन समुच्चित्योच्यते मत्कर्मकृदिति मत्कर्मकृत्मदर्थं क
र्म मत्कर्म तत् करोतीति मत्कर्मकृत् मत्परमः करोति भ
गवान् स्वामिकर्म न ह्यात्मनः परमा प्रेप्सा गन्तव्या गतिरिति स्वा
मिने प्रतिपद्यते अयत्न मत्कर्मकृत्मामेव परमा गतिं प्रति
पद्यत इति मत्परमोहं परमः परा गतिर्यस्य सोयं मत्परमः
तथा मद्भक्तः मामेव सर्वप्रकारैः सर्वात्मना सर्वोत्साहेन भजत
इति मद्भक्तः सङ्गवर्जितः धनमित्रपुत्रकलत्रबन्धुवर्गेषु स
ङ्गवर्जितः सङ्गः प्रीतिःस्नेहवर्जितोनिर्वैरोनिर्गतवैरः अतः स
र्वभूतेषु शत्रुभावरहितः आत्मनोऽत्यन्तापकारग्रहणेष्वपि
यईदृशोमद्भक्तः समामेत्यसावेव तस्य परा गतिर्नान्या कदाचि
दपीति ५५ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयो
गशास्त्रेश्रीशाङ्करभाष्यटीकायां एकादशोध्यायः ११ ॥

आनन्दगिरिकृतटीका २

भक्तानिति विशेषणादन्येषामहंतामाशंक्याह अधुनेति स
मुच्चित्य संक्षिप्य पुञ्जीकृत्येति यावत् मत्कर्मकृदित्यत्र मत्प
रमत्वे आर्थिके इति पुनरुक्तिमाशंक्याह करोतीति भग
वानेव परमा गतिरिति निश्चयवतस्त्वेव निष्ठा सिध्यतीत्याह
तथेति ननेत्येव सर्वप्रकारैर्भजनं धनादिस्नेहाकृष्टतादित्याशं
क्याह सङ्गेति द्वेषपूर्वकानिष्टाचरणे वैरं अनपकारिषु तद्भावे
पि भक्तेष्वपकारसिद्धिति शङ्कित्वाह आत्मनइति एतच्च सर्वं
संक्षिप्यानुष्ठानार्थमुक्तमेव मत्तोनिष्टोभगवत्प्राप्तिरव
स्थाविनीमुपसंहरति अयमिति तदेवं भगवतोविश्वरूपस्य

सर्वात्मनः सर्वज्ञस्य सर्वेश्वरस्य मत्कर्मकृदित्यादिना क्रममुक्ति
फलमभिधानमभिवदता तमदवाप्तोऽर्थोऽवस्थापितः ५५
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायोगशास्त्रे श्रीम
दगिरिकाटीयोपकादशोध्यायः ११

स्वामिकृतटीका २

अतःसर्वशास्त्रसारंपरमरहस्यमृषिवाद मत्कर्मकृदिति म
दर्थंकर्मकरोतीति मत्कर्मकृत् अहमेवपरमःपुरुषोऽय
मस्मःममैवभक्तिमाश्रितःपुत्रादिषुसंगवर्जितः निर्वैरश्चस
र्वभूतेषुएवंभूतोयःसमामाप्नोतिनान्यइति ५५ देवैरपिसह
दर्शनपोदानादिकोटिभिः भक्तायभगवानेवंविश्वरूपमदर्श
यत्॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायोगशास्त्रेश्रीम
त्कोयैकादशोध्यायः ११

रामानुजभाष्यटीका ३

मदितिवेदाध्ययनादीनिसर्वाणिमदाराधनरूपाणीतियःक
रोतिसमत्कर्मकृत्मत्परः सर्वेषामारंभाणामहमेवोद्देश्यो
यस्यसमत्परमः अतएवमत्प्रियत्वेनमत्कीर्तनस्तुतिध्यानार्च
नप्रणामादिभिर्विनात्मधारणमलभमानोमदेकप्रयोजनतः
नैवरमतेमत्समवमानःनिर्वैरःसर्वभूतेषुमत्तोन्यंमदेकप्रियते
वैरःस्वस्वभावतोनमूढैःक्वसापराधैर्नैवनानुसंधानात्स
र्वभूतानांपरमंभूतमजानतोनानुसंधानात्स
भावतेषुनिर्वैरः एवंभूतःसमामेतिमायैवावस्थितेप्रा
प्तिनिरस्तविद्यादिशेषदोषगंधोमदेकानुभवोभवतीत्यर्थः
५५ इतिश्रीमद्भगवद्गीतारामानुजाचार्यविरचितश्रीमद्भग
वद्गीताभाष्यटीकायामेकादशोध्यायः ११

मध्वनवमस्कृतटीका ४

सकलोपसंहारोनेपरमप्रशांतरूपोन्यत्तत्रास्तिनिंदतीति
उपसंहारेभगवतःसौम्यतांचविद्यमानान्यत्रेयरमणीयायेषां

भक्तिः परिपोस्फूर्तितेषांवासुदेवंसर्वमितिमादिपूर्वाभि
हितोपदेशचमत्काराद्विज्ञातात्मकेवासुदेवतत्त्वमयत्नतए
वबोधपदवीमवतरतीतिशिवम् ५५ शुद्धाशुद्धविमिश्रो
धेसंविदैक्यप्रकाशनात् भूर्भुवःस्वस्वयंप्रपञ्चमतेनस
मोमुनिः षष्ठोत्रसंग्रहः इतिश्रीमदाचार्याभिनवगुप्तवि
रचितेश्रीभगवद्गीतार्थसंग्रहेषष्ठोध्यायः ६

परमार्थप्रपादीका ७

अथसंन्यासस्यस्वरूपादि मत्कर्ममत्परमिति मदर्थंकर्मकरोती
तिमत्कर्मकृत् अहमेवपरमः पुरुषार्थोयस्यमयिभक्तो
मदाश्रितः पुत्रकलत्रादिसंगवर्जितः सर्वभूतेषुनिर्वैरोभ
वति समाप्नोति नान्यः तदुक्तं मत्संगभिभक्तिंलभते ना
नारंभेरनेगाद्युथमभिलिवतश्चिविणेभ्यासलभ्यसोरभ्यं
नैवतस्मिन्नतसरथहृयेमेडलेचेडरत्मेः नीवनेजस्विलो
कीतिमिरनिरमनेतद्दानेदमेमासाभ्यासभाजोनसलभ
मपितश्रीयहृतेसभक्ता ५५ अथायुतासंयतमानुष्यम
सेचेन्मयितदप्रनेयभूर्भुवः स्वर्महातःस्वीकारेवैभवं
चाभयमस्तगतिंदृष्टमिछास्तिनेचेत् तत्सथणागतिव
र्गेनिहतमिहमयादत्तयादिव्यदृष्ट्याब्रवीन्द्रवेत्वानिति
यडपनिनाप्रोक्तमेकादशेस्मिन्॥ इतिश्रीमदेवंसंपडि
तसूर्येविरचितायांभगवद्गीताटीकायांपरमार्थप्रपायो
विश्वरूपाख्यमथमप्राणनिरूपणोनामैकादशोध्यायः११

दशमीटीका ८

अधुनासर्वसंगीताशास्त्रसारभूतोर्थोनिःश्रेयसार्थिना
मनुष्यानायपुंजीकृतोद्यत्न मदर्थंमत्कर्मकृत् मत्प
रणया मत्प्रीत्यर्थंकर्मकारी स्वर्गादिकामनायासशोक
शमेवमितिनेत्याह मत्परमः प्राप्तेनानिश्चितोनतस्व
र्गादिर्यस्यसः अतएवंप्राप्तोक्षयामद्भक्तः सर्वोत्तमत्वयो
सर्वकर्मत्यागयुक्तः पुत्रादिष्वेवहसतिकथंतत्यजेवंप्रेमस्यादि

त्माह संगवर्जितः वा वत्सस्त्वहामूत्रः शत्रुष्वद्वेषवान्तिकथमेवंस्या
त्तेनाह निर्वैरः सर्वभूतेषुत्रुपकारिष्वपिद्रुहवभूत्यायः समामाने
दचनेसदनेनगुणान्तयेवंसद्देवत्तनयमेतिनिर्मुक्तोविषयैस्त
न्मनास्मंप्राप्नोतीत्यर्थः निरंजनः परमेसाम्यमुपैतीतिश्रुतेः
समसाधर्म्यमागताइतिवक्ष्यमाणत्वाच्च अयमर्थस्तयाज्ञानसि
द्धो मयोपदिष्टोनान्यः परंकिंचित्कर्तव्यमस्तीत्यर्थः ५५ इतिश्री
वनमालीकायोभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशा
स्त्रेगीतादीकायांपंकादशोध्यायः ११

अथद्वादशोध्यायप्रारंभः

नन्वयंचेत्तर्हिवेदनयोदानेज्यानांसाधनानांकागतिरित्यपेक्षा
यांयथोक्तयाभक्त्यावेत्तुंद्रष्टुंप्रवेष्टुंचशक्यःसिनयाभक्त
स्तद्भक्तःकीदृशोभवतीत्याशंक्यायामाह मत्कर्मकृदितियोम
दाराधनार्थंयेवकर्माणिवेदनयोदानेज्यादीनिकरोतिसमत्क
र्मकृत् नन्विहामुत्रचानेकभोगकामनायांसत्यांकथमेवंनिः
स्पृहस्यादितिचेन्नाहमत्परमः अहमेवपरमः सर्वेषामुपाय
भूतानांकर्मणांमुद्दिश्योयस्यसमत्परमः नन्विहामुत्रचभोगेच्छु
रित्यर्थः नन्वमित्रपुत्रकलत्रादिषुस्नेहसंतिकथमेवंस्यादिति
चेन्नेत्याहसंगवर्जितः सर्वेषुस्वानुकूलेषुप्राक्तनवस्तुषुरागा
रहितः नन्वशत्रवेगोष्ठेवैसंतिकथमेवंस्यादितिचेन्नेत्याह
निर्वैरः सर्वभूतेषुस्वप्रतिकूलेष्वपिभूतेषुप्राणिषुनिर्वैरोवै
रमूल्यःयतोऽस्यसर्वेष्वपिमद्दर्शनेनहेत्वभावान्नमुद्यन्न
मेवेत्यर्थः ईदृशोयस्मादेवमद्भक्तःमत्प्रवणःकीर्तनादिनव
लक्षणाभक्तेराश्रयोनान्यः हेपार्थवपाएतन्नयसएवचम
त्सुनेश्रीमुकुंदमेतिमद्भावापत्तिलक्षणोमोक्षंप्राप्नोतिनान्यः अ
तःपरंकिंचिज्ज्ञातव्यंकर्तव्यंनास्तीत्यभिप्रायः ५५ योहि
विश्वम्भरोदेवोविश्वरूपेणमोहनम् सएवस्वानताभिन्नमहर
तेनमाम्यहम् १ इतिश्रीनिगमानंदवैशाखनेपौर्णमास्यांद्वादशस्यां

+ अधुनासर्वत्रगीताशास्त्रस्यसारभूतोर्थोनिःश्रेयसार्थिनामनुष्ठानायसंजीकृत्योच्यते॥

नेवाशिनागिरिधारिदासेनविरचितायांगीतार्थकुसुमवेज्यं
यामेकादशोध्यायः ११ मधुसूदनीटीका ११

+ मदर्थेकर्मवेदविहितंकरोतीतिमत्कर्मकृत् स्वर्गादिकामना
योसमाकथमेवमितिनेत्याह मत्परमः अहमेवपरमःप्रा
प्यतेनतिश्चितोनत्वस्वर्गादिर्यस्यसः अतएवमत्प्राप्त्याशया
मद्भक्तः सर्वैःप्रकारैर्ममभजनपरः पुत्रादिषुस्नेहसतिकथ
मेवंस्यादितिनेत्याह सेगवर्जितः वासुदेवस्सर्वमितिभावः शत्रुषु
षेसतिकथमेवंस्यादितिनेत्याह निर्वैरःसर्वभूतेषुअपका
रिष्वपिद्वेषशून्योयःसमामेति अभेदेनयोऽव अयमर्थस्तया
ज्ञानमिष्टोमयोपदिष्टोनातःपरंकिंविकर्मेत्यमस्तीत्यर्थः ५५
इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपा
दशिष्यश्रीमधुसूदनसरस्वतीविरचितायांविश्वरूपदर्शन
निरूपणंनामैकादशोध्यायः ११

सदानंदीटीका ११

गीताशास्त्रस्यसर्वस्यसारभूतोर्थआदरात् निःश्रेयसार्थिनोसम
नुष्ठानायचाधुना पुंजीकृत्योच्यतेश्रीमद्धरिणाकरुणाब्धिना
मदर्थंकर्मवेदोक्तंकुर्वन्योमत्परायणः सप्राप्यतेनयस्माद्वि
श्चितोनापरोर्थोकःमद्वाक्याश्रवणेनश्चमद्भक्तःसर्वथात्मनायाभज
मेवसर्वथाप्रीत्यासर्वोत्साहेनसर्वदा सर्वात्मनायाभजनमत्व
मुपविष्टमानसः पुत्रवित्रकलत्रादौभोगेषुस्नेहवर्जितः सर्वभू
तेषुमद्दृष्ट्यासमकृशत्रुमतिःप्रमान् ५ स्वस्मात्संतापकारादि
हेतोरपुपकारकृत् इष्टेष्टंभमभूतोयोमद्भक्तोमानुषेतिसः
६ परागतिरहेतस्यहरिरेवनचापरा अयमर्थस्त्वयास्तानमिष्टो
नलेमयोदितः ७ नातःपरंचकर्तव्यंकिंविदिमाणयोहरेः ५५
ममवेदैरयज्ञैःस्मृतिमतेविधिनाकृतानुष्ठानतोपिस्वातःक्ले
शलोभिर्निजसमकर्मकैः ब्राह्मणेभ्योपिदत्तैः यःशक्तोनैव
लोकेकथमपिरिविज्ञैरिष्टमिच्छद्भिरीशः शक्तोयोनमभक्त्या
प्रविशतहृदयंमेमत्कृत्यःसभक्तिः ५५ इतिश्रीभावप्रकाशे
श्रीसदानंदविदाकृतेहरिप्रसादमाहात्म्यपूर्तिमेकादशोध्यायः ११

शास्त्रसर्वस्वसंग्रहरूपाणिमत्कर्मकृदिति मदर्थमेवकर्माणिक
रोतीतिमत्कर्मकृत् अहमेवपरमोनिष्कल प्राप्योयस्मिन्मम
रमः यतेनकृत्स्नःकर्मयोगोध्यानयोगश्चनेपदार्थशोधकउक्तः
ममभक्तआराधनकृदिति उपासनाकोशब्दार्थसंग्रहः संगवर्जित
इमनेनपदेनभगवत्प्राननिष्ठइत्युक्तं निर्वैरइति विश्वभग
वदात्मनापश्येदित्युक्तं अन्यथाभेदबुद्धिमतोनिर्वैरत्वासंभवात्
एवंभूतोयःसमोनत्सदत्स्वार्थभूतमवज्ञानेदेकचनेपतिप्राप्नो
ति प्रसगभेदेन हेपोऽवविश्वरूपेशज नमेवैत ज्ञातेशक्नोषी
तिभावः ५५ इतिभीष्मपर्वणिनेलकंठीयेभारतभावदीपेए
कादशोध्यायः ११ ३५

संहरति मत्कर्मकृत्मत्परमित्यनेनवर्णाश्रमकर्माणिमत्प्राप्त्यर्थमेवकरोति
नतुफलांतरार्थम् अतएवमत्परः अहमुपादेयोयस्यमद्भक्तः स
र्वास्ववस्थासुसर्वथैवसमाहितचित्तः सर्वभूतेषुसंगवर्जितोरागद्वे
षरहितः समामेवब्रह्मैकात्म्येप्राप्नोति ५५ इतिश्री
भगवद्गीता ज्ञानेश्वरीटीकायामेकादशोध्यायः ११ ॥ ॥

संहरति एवंयोगाविशिष्टोयोयंकृत्स्नोमयाऽभिहितः समासेन मद्भेदल
क्षणोमिश्रितोपिगळ्हनिकोदशोमत्कर्मकृच्चासचोदितानितानि
वर्णाश्रमकर्माणिकरोतिकिंतुमदर्थंयथोपपन्नम
प्रकृष्टोयस्तत्तन्मद्यागादिरूपंकर्मसमस्तइयोपादेयतयाम
न्मयमेवभक्तः सर्वास्वस्थासुसमग्रेष्वेवसमर्पितांतःकरणत्वासद्वि
सर्वभूतेषुचराचरभावेषुनिसंगोरागरहितोनिर्वैरोद्वेषवर्जितः
योसतत्तनयारागद्वेषविषयतेनसर्वेसंसारिभिः परिहीनेषव
स्वपतिरतिरायामतनिर्भरंमत्स्वरूपमेवसततमनुभवति समा
मेवेति सिद्धोमुक्तः इहाध्यवसितार्थमित्यर्थम् संचतेषुस्वभावे

नवेतत्वद्भक्तविधेरेकमेकांतभक्तंद्रष्टुंवद्भिर्भवभेदैरितिविहितपरामर्शो
मुक्तश्रमाणाम् स्वात्मनेवेश्वरंवामणिमकुरःस्वयमन्यतोवैश्वरूपं
स्वाध्यस्यास्यतीतेस्फुटमभिमतवतोव्याख्ययैकादशस्य ५५ ॥
इतिश्रीभगवद्गीता रामकंठीटीकायां एकादशोध्यायः ११ ॥

अथसर्वशास्त्रसारभूतप दिप्रोति॥ रामकी द्वादशटीका

हेपांडव एवविधोमद्भक्तोमदर्थमकोयःसमंप्राप्नोति किंविधस्त्वा
ह मत्कर्मकृत् मत्प्राप्त्यर्थमेवाकृत्स्नाकर्मकरोति तथासंगवर्जि
तः आसक्तिरहितः तथासर्वभूतनिर्वैरःमेत्रादिविनपरिक
र्मसंयत्नःइतिशुक्लानिरोधेनमत्परमः अहमेवसर्वप्राप्यस्व
र्यःइतिशिवम् महात्मापुमाविश्वरूपदर्शनेसमर्थयत् यःप्रेष्ठा
र्जुनायैवभक्तायैनंनमामिनम् ५५ इतिश्रीभगवद्गीता
वेसएकादशीटीकायां विश्वरूपदर्शनेनामैकादशोध्यायः ११ ॥

पंद्रहवींटीका

इदानींसर्वस्यगीताशास्त्रस्यसारभूतोऽर्थःनिश्चेयसार्थीनुष्टेय।
त्वेनसंक्षिप्योच्यतेमत्कर्मइति हेपांडवयःमत्कर्मकृत्म
दर्थंकर्मकरोतिइतिमत्कर्मकृत्मत्परमःअहंपरमागतिर्यस्स
मयेवप्रकारैःभजतेइतिमद्भक्तः यतश्चैवंकलत्रेषुसंगवर्जितः
प्रीतिस्नेहवर्जितःसकलभूतेषुनिर्वैरश्चशत्रुभावनआत्मनः
प्रत्यंतास्नेहेकृतेऽपिनिर्गतवैरश्चयईदृक्सोमद्भक्तःसमामेति
अहमेवतस्यपरागतिः ५५ इतिश्रीपंचदशेऽध्यायेआचार्यकृतटीका
यांएकादशोध्यायः ११

सत्तावीससमिद्धोपिनी॥

इदानीमर्थसंग्रहवाक्यमुपदिशति मत्कर्मकृदिति मत्कर्मकृ
न्मयैवपूर्वमेव यत्कर्मकृतंतन्मयैवैतेनिदृताःपूर्वमेवेत्यादि

वचनात्कृतंतदेवकर्मकरोतीति मत्कर्मकृत्स्वधर्मत्वादिति
अथवा मदर्थंकर्ममत्कर्म तदपिस्वधर्मलक्षणंकर्म मदर्थं
मय्यर्पितभावनयाकुर्वतोनतेहिंसादोषः अथवामत्कर्म मतो
विश्वरूपकर्मणोन्मोत्यत्कायत्कर्मतदेवयेषांतेमत्कर्माणोमहि
मत्वामद्भक्तपात्रत्वात्कृतमिति मात्र्यतीति मत्कर्मकृत्त्वेति
भगवदाज्ञैवमर्वस्वयंतस्यनिर्लेपत्वादिति तथामत्परमः
मनोमत्संकल्पणदाज्ञोधृतेतिप्रोषः परानिर्वृत्तीनातीति म
त्परमोभवेति अथवा मत्परमोहमेवधर्मविकृत्यपरान्तीना
ति भगवदाज्ञयेवपरावृत्तिन्तीतिव्युत्पत्त्यामत्परमोभवेति अथ
वामत्परमोहमेवपरमः पूज्योयस्यसपतादृग्लक्षणोभवेति
नतेकश्चिद्दोषः तथामद्भक्तोनपवर्गंपरहितोनिर्लेपश्चत्येता
दृग्लक्षणोयस्त्वंसर्वभूतेषुसर्वेषुपरापरेषुचप्राणिषुनिर्वैरः
सन्परमप्रेमरूपाद्विश्वधर्मेवत्तानचेति संप्राप्तमदनुग्रहःस
त्वंमामद्भिन्नतयादृष्टेषि इणगतावितिधातोः गत्यर्थाज्ञाना
र्थाश्चेतिवचनादेविज्ञानासीत्यर्थोबोध्यतेश्रुति अत्रपांडवेति
संबोधनपदंमहाक्रमस्तत्रसृष्ट्यर्थस्वभावत्वाद्विगतस्वधर्मा
चरणविषयसंदिग्धचित्तमलत्वसंभावनाप्रतिपादनार्थंमि
ति विश्वरूपदर्शनमात्रात्यांश्चवःसंजातसमग्राह्लादः
स्वधर्माचरणसमुत्सुकोबभूवेतिभावः ५५ इतिश्रीमद्भग
वद्गीताभाष्ये एकादशोध्यायः ११

५५ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमद्भ
गवद्गीताभाष्ये एकादशोध्यायः ११

भाषा अनुवाद

अब शास्त्र के अर्थ का सारांश परम रहस्य कहते हैं कि हे पाण्ड
व मत्कर्म कृत कहे मेरी प्रीति के अर्थ जो कर्म करै है और
मत्परम कहे मेही है परम प्रयोजन जिसको और मद्भक्त क
हे मेरे आश्रित यथा पुत्र स्त्री धन मे आशक्ति हीन और भूत
कहे प्राणि मात्र मे वैर रहित जो है सोई हमको प्राप्त होताहै
५५ इतिश्रीजगन्नाथ शुक्ल विरचितायां मनभावनीटीकायां
एकादशोध्यायः ११

दोहा

मोरे कर्म सो परम हित संगत जहो सो भक्त सभी जीव मे वैर
विन सो पांडव सो शक्त ॥ ५५ ॥